महत्त्वाभंत्वभेदेन कथ्यन्ते देवताः श्रुतौ ॥
यथार्थो वक्ष्यमाणाया विचारेण प्रतीयते ॥ १८७ ॥

तथाच ऋग्वेदस्य २७ सूक्ते १३ ऋक् ॥

"नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः

Digitized by Google

यजाम देवान् यदि शक्नवाम मा व्यायसः शंसमा वृक्षि देवाः" इति ॥ १३ ॥

इमे देवा यथा सर्वे कल्पिता न च वास्तवाः ॥
तथा तत्स्तावका मन्त्राः पौरुषेया भवन्त्यमी ॥ १८८ ॥
ऋषीत्यभिख्यया ख्याता ये ये मन्त्रानकल्पयन् ॥
वेदानुक्रमणीकारस्तत्तन्नामानि भाषते ॥ १८९ ॥
ऋग्वेदस्यादिमे सूक्ते विभिद्यन्ते द्विधर्षयः ॥
पूर्वे च नूतनाश्चेति प्रोक्ते मन्त्रकारिका ॥ १९० ॥ यथा ॥
"अग्निः पूर्वेभिर्ऋषिभिरीड्यो
नूतनैरुत स देवां एह वक्षति" ॥ इति ॥
पूर्वापरत्वमेतेषां यथा मन्त्रकृताम् अभूत् ॥
मन्त्राणां तद्वदुत्पत्तिं विदन् पूर्वापरोऽभवत् ॥ १९१ ॥
एतस्यां वक्ष्यमाणायामृचि स्तोत्रस्य मूलता ॥
स्वयं तत्कारिका विदन् पुनःशेपेन कथ्यते ॥ १९२ ॥

यथा २७ सूक्ते ४ ऋक् ॥

"इममूषु त्वमस्माकं सनिं गायत्रं नव्यांसं अग्ने देवेषु प्रवोचः" इति ॥ ४ ॥

यदा सुयोगतो राजा गृहस्थो वाऽवियज्ञत ॥
तदा स सूरिका सूक्तमुपयुक्तमचीकरत् ॥ १९३ ॥
मन्त्रास्तु भूरयो विदन्नेवं कार्यवशात् कृताः ॥
इत्येतत् तत्तदर्थस्य विचारेण प्रतीयते ॥ १९४ ॥

Digitized by Google

यतो नामानि भूतानां संग्रामाद्यैरिभिः सह ।
पराजयश्च प्रभूणां भूयःसूक्तेषु कथ्यते ॥ १९५ ॥
प्राचीनैर्यज्वभिर्मन्त्रा दृष्टेऽरण्यन्त यादृशाः ।
तादृशा एव दृश्यन्ते प्रायः सर्वेऽधुनावधि ॥ १९६ ॥
ते देवस्तुतिमात्रार्थमाक्रियन्त पुरोधितैः ।
न कस्याप्याग्रहस्तेषु मतभेदस्य दृश्यते ॥ १९७ ॥
यान् देवस्तुतये कुर्मो मन्त्रांस्ते ब्रह्मसम्भवाः ।
इत्येतत् तत्कृतेः काले कोपि नामंस्त मन्त्रतः ॥ १९८ ॥
अतः सभूपनामानि युद्धादीनि समानि ते ।
स्वकालिकानि दृष्टानि स्तोत्रसूक्तेष्वकीर्तयन् ॥ १९९ ॥
यदा प्रालप्राप्तु सूक्तानि बुधाः पूज्यानि मेनिरे ।
तदाऽन्ये ब्रह्मजोक्तानि वस्तु मारेभिरे क्रमात् ॥ २०० ॥
ततश्च यानि कथ्यन्ते तत्र दृष्टानि भूभृतां ।
ब्रह्मोक्तिबाधनात् तानि समाधातुं चिचेष्टिरे ॥ २०१ ॥
अर्थस्त्वेतादृशो विदन् येषु मन्त्रेषु दृश्यते ।
तेषां कदापि नित्यत्वं मन्तुं नार्हन्ति पण्डिताः ॥ २०२ ॥
आदौ ते वैदिका मन्त्रा नासन् यज्ञेषु संहिताः ॥
मुखाकृतास्तु पूर्वेषां प्राचलन्नत्र भारते ॥ २०३ ॥
ये ये यै र्यैर्वसिष्ठाद्यैः स्तुता मन्त्रास्तु सूरिभिः ॥
ते ते तत्तत्कुलै र्मन्त्राः प्रारब्धन्तेति मन्यते ॥ २०४ ॥
ये ये मन्त्रा वसिष्ठेन व्यरचन्त पुरोधसा ॥

Digitized by Google

तांस्तान् वशिष्ठजा दक्षः पुत्रपौत्रादयः क्रमात् ॥ २०५ ॥
तथा यान् यान् कविर्मन्वान् विश्वामित्रः प्रशीतवान् ॥
तांस्तान् ररक्ष तद्वंशः तदन्यकुलेष्वभूत् ॥ २०६ ॥
चिरात् परम्पराप्राप्तास्ते चिरन्ता यदाऽभवन् ॥
तदा महादरं तेषां कर्तुमारेभिरे जनाः ॥ २०७ ॥
यदर्थः स्वापि यः कोऽपि प्राचीनो भुवि जायते ॥
प्रायोऽद्भुतेन पश्यन्ति जनास्तं पूजयन्ति च ॥ २०८ ॥
अतो यद् वैदिकान् मन्त्रान् लोका दैवांस्तदाऽवदन् ॥
इत्यत्र विस्मयो विद्वन् न कर्त्तव्यो विचारिभिः ॥ २०९ ॥
ये ये च प्राक्तना मन्त्रान् श्रुतवन्तः पुरोधसः ॥
अमीषामपि दैवत्वं लोको मन्तुं प्रचक्रमे ॥ २१० ॥
तदा जनकृतौ निष्ठान् विकीर्णान् यत्र कुत्रचित् ॥
मन्त्रान् समग्रहीत् सर्वान् व्यासः पैलादिसंवृतः ॥ २११ ॥
स मन्त्रग्रन्थनाद् हेतो व्यास इत्यभिधीयते ॥
अर्थेन व्यासशब्दो हि ग्रन्थकर्त्रभिधायकः ॥ २१२ ॥
कृष्णो द्वैपायनो नाम्ना व्यासानां कथ्यतेऽन्तिमः ॥
प्रागग्ने भूरयोऽभूवन्निति पौराणिकी कथा ॥ २१३ ॥
एतत्तु वेदमाहात्म्यबृंहणाय प्रकल्पितं ॥
तद्वार्त्ता वास्तवी विद्वन् पुराणेषु न कथ्यते ॥ २१४ ॥
ऋगादिसंहिता व्यासः शिष्यैर्युक्तो यदाऽकरोत् ॥
तदानीमखिलार्थानां ग्राम्या नातिष्ठदादिवत् ॥ २१५ ॥

Digitized by Google

परन्तु व्यवहारेण विदुषामुपयोगेन च ॥
सा भावा संस्कृतिं प्राप्य रूपमादत्त नूतनं ॥ २१६ ॥
यदा व्यासादयो मन्त्रान् व्यग्रथन् संहिताक्रमी ॥
तदाऽपि प्रायशः सर्वे मन्त्राः प्रत्ना अवेक्षत ॥ २१७ ॥
उत्पत्तिर्युगपत् तेषां समेषां तु न बुध्यते ॥
ते कालादेः पृथक्त्वेन व्यरच्यन्त शनैः शनैः ॥ २१८ ॥
मन्त्रेष्वेतु प्राक्तनैः साकमपि नूतानि कानिचित् ॥
सूक्तानि मिश्रयामासुः संहिताकारिणो बुधाः ॥ २१९ ॥
सूक्तानां यदृदन्येषामुक्तिः प्रत्ना प्रकाशते ॥
उक्तिः पुरुषसूक्तस्य तद्वत् प्रत्ना न भासते ॥ २२० ॥
तस्मात् पुरुषसूक्तं तत् संहिताक्रत्यमेष्यति ॥
प्रत्नं नासीद् नवं त्वित्थं तदुक्तेरनुमीयते ॥ २२१ ॥
ऋगादिलक्षणं विद्वन् यदाचार्यचतुष्टयं ॥
तदन्तर्गतमन्त्रामिदं जागीहि वर्णनम् ॥ २२२ ॥
यावन्तः संहिताः सन्ति मन्त्रा ऋक्संहितान्तरे ॥
मन्त्राणां तावतां रूपमादिमं तत्र दृश्यते ॥ २२३ ॥
तान् यादृशेन रूपेण चक्षुरादौ पुरोधसः ॥
ऋग्वेदे तादृशाकारास्ते दृश्यन्ते यथातथं ॥ २२४ ॥
मन्त्रास्तु सामगामानः सामवेदे भवन्ति ये ॥
ते सन्ति प्रायशः सर्वे ऋग्वेदावयवात्मकाः ॥ २२५ ॥
ऋचस्तस्यैव वेदस्य छिन्ना भिन्नाः सहस्रधा ॥

Digitized by Google

उद्गातृभिः प्रयोज्यानि साम्नि सामानि जज्ञिरे ॥ २२६ ॥
मन्त्राश्च ये यजुर्वेदे चितास्तेष्वपि भूरयः ॥
ऋग्वेदावयवाः सन्ति रूपमादाय याजुषं ॥ २२७ ॥
अथर्वसंहितामध्ये ये मन्त्राः सन्ति संचिताः ॥
तेऽन्यत्रिवेदमन्त्रेभ्यो प्रायः सन्ति विलक्षणाः ॥ २२८ ॥
तत्रैकेऽर्थमिश्रापार्था आत्मरक्षार्थकाः परे ॥
दर्भाद्योषधयः काश्चित् सम्बोध्यन्ते च केषुचित् ॥ २२९ ॥
अथर्ववर्त्तिनानार्थविचारात् तस्य भूयसः ॥
मन्त्रान् ऋग्वेदमन्त्रेभ्यो नूनानाञ्च विवेकिनः ॥ २३० ॥
वेदानां संहिताः सर्वाः रचिताः प्राचलन् यदा ॥
तदानीं पण्डितास्तासां महाभ्यासमकुर्वत ॥ २३१ ॥
ये ये तदातनास्यासन् सर्वोत्कृष्टा विपश्चितः ॥
त वेदव्याकृतिं कर्त्तुमारभन्त यथामति ॥ २३२ ॥
एवं व्याकरणादीनां तद्व्याख्यानोपकारिणां ॥
वेदांगानां समग्राणां रचना क्रमशोऽभवत् ॥ २३३ ॥
विद्याव्युत्पत्तिमत्त्वा लोकाः प्राप्य ततः क्रमात्॥
नानानिगूढवादेषु प्रारभन्त प्रवर्त्तितुं ॥ २३४ ॥
जगत् कथं समुत्पेदे किमनाद्युत सादि तत् ॥
किं तस्य कोपि कर्त्ताऽस्ति कुतो विश्वं स सृष्टवान् ॥ २३५ ॥
स किं मूर्त्तोऽस्त्यमूर्त्तो गुणवानुत निर्गुणः ॥
इत्यादितत्त्वजिज्ञासा विदुषां धीष्वजायत ॥ २३६ ॥

Digitized by Google

एतादृग्विषयोद्देशो वैदिकोपनिषत्कृताः ॥
क्षमाजन्मसुवीक्षाभ्यां विपश्चिद्भिरुदीर्यते ॥ २३७ ॥
प्रायः सर्वेषु सूक्तेषु ये पूज्यन्ते विभूमतः॥
तेषां दिवौकसामाद्यो महिमा क्रमशोऽश्नुते ॥ २३८ ॥
कुत्राप्युपनिषत्क्षेषां परमत्वं न मन्यते ॥
परन्तु केवलत्रात्र परमात्मा प्रशस्यते ॥ २३९ ॥
तत्पश्चाद् विदुषां मध्ये सञ्जातायामसम्मतौ ॥
नाना मतानि देशेऽस्मिन् नाना प्राचीचरन् बुधाः ॥ २४० ॥
एवं ज्ञातानि विद्वद्भिः स्वस्वमत्यनुसारतः ॥
वेदान्तन्यायसांख्यादिदर्शनानि प्रजज्ञिरे ॥ २४१ ॥
व्यासादिकल्पितेष्वेषुदर्शनेषु परस्परं ॥
महान् विपर्ययो नाना विषयेषु प्रकाशते ॥ २४२ ॥
निमित्तं जगतो ब्रह्म तच्चोपादानकारणं ॥
तद् ब्रह्म केवलं नित्यमिति व्यासेन मन्यते ॥ २४३ ॥
अथवा प्रकृतिर्नित्या परिणम्य स्वयं स्वतः ॥
संसारजनयित्रीति कपिलः सूरिरब्रवीत् ॥ २४४ ॥
ईश्वरः कोपि नास्तीति कपिलेन प्रकल्प्यते ॥
पतञ्जलिस्तु विश्वस्य ब्रूते स्रष्टारमीश्वरं ॥ २४५ ॥
सूक्ष्मैरनादिभिः सद्भिः परमाणुभिरीश्वरः ॥
सस्रर्ज विश्वमित्यादिमतं प्रोवाच गोतमः ॥ २४६ ॥
इमे मुनीतिशब्देन प्रसिध्यन्त्यत्र भारते ॥

Digitized by Google

ते खेन खेन मार्गेण मम्यां मुक्तिं वदन्ति च ॥ २४७ ॥
परन्तु जैमिनिव्यासौ विना दर्शनकारकः ॥
सम्यक् प्रामाणिकः कोपि नास्तीत्यं केचिदूचिरे ॥ २४८ ॥ यथा
"अक्षपादप्रणीते च काणादे सांख्ययोगयोः ॥
त्याज्यः श्रुतिविरुद्धोंऽशः श्रुतैकशरणैर्नृभिः ॥
जैमिनीये च वैयासे विरुद्धांशो न कश्चन" ॥ इति ॥
अत्रैतत् तर्क्यते विद्वन् मान्यदेको मुनिर्यदि ॥
तदा किं भ्रान्तिरन्येषामपि नो सम्भवेदिति ॥ २४९ ॥
मुनिभ्यः कपिलादिभ्यः कथं व्यासो विशिष्यते ॥
भ्रान्तास्ते यदि तर्ह्यस्य प्रामाण्यं जायते कुतः ॥ २५० ॥
सम्यग् वेदानुसार्यस्ति जैमिनिव्यासयोर्मतम् ॥
वेदप्रतीपमन्येषामिति मीमांसका विदुः ॥ २५१ ॥
परन्तु तत्र पृच्छामि ये बुधास्त्रिरे श्रुतिम् ॥
अमी कथं विशिष्यन्ते कपिलादिगणादिति ॥ २५२ ॥
ऋषीणां वेदवक्तॄणां गणः प्रामाणिको यदि ॥
प्रामाण्यं कपिलादीनां कुतस्तर्हि न सिध्यति ॥ २५३ ॥
नानाशास्त्रेषु माहात्म्यं कपिलस्य प्रशस्यते ॥
पुत्रा भस्मीकृतास्तेन सगरस्येति कथ्यते ॥ २५४ ॥

तथाच रामायणे बालकांडे ४१ सर्गे उक्तं ॥

"श्रुत्वा तद्वचनं तेषां कपिलो रघुनन्दन ॥
रोषेण महताविष्टो हुंकारमकरोत् तदा ॥

Digitized by Google

ततस्तेनाप्रमेयेण कपिलेन महात्मना ।
भस्मराशीकृताः सर्वे काकुत्स्थ सगरात्मजाः" ॥ इति ॥
एतादृशे न कर्त्तव्यो दोषारोपो महामुनौ ॥
इत्येतद् उक्तमुद्दिश्य व्यासो भागवतेऽब्रवीत् ॥ २५५ ॥ यथा ॥
"न साधुवादो मुनिकोपभर्जिता दवेन्द्रपुत्रा इति सत्त्वधामनि
कथं तमो दोषमयं विभाव्यते जगत्यविद्यात्मनि खे रजो भुवः ॥
यस्येरिता सांख्यमयी दृढेह नौ र्यतो मुमुक्षुस्तरते दुरत्ययं ॥
भवार्णवं मृत्युपथं विपश्चितः परात्मभूतस्य कथं पृथग्मतिर्" इति
अत्रावधीयतां विद्वन् स्वयं व्यासश्चकार यत् ॥
तस्मिन् भागवते श्रद्धा कपिलस्यास्ति कीदृशी ॥ २५६ ॥
या नौः परात्मभूतेन तेन सांख्यमयी कृता ॥
तया नरास्तरन्तीति स्वयं व्यासेन कथ्यते ॥ २५७ ॥
मुनिः परात्मभूतोऽभूद् वस्तुतः कपिलो यदि ॥
तर्ह्यप्रामाण्यमेतस्य न्यायतः सम्भवेत् कथं ॥ २५८ ॥
पुनस्तदुक्तसांख्येन विमुक्तिर्यदि गम्यते ॥
तदा प्रामाणिकत्वेऽस्य संशयः क्रियते कुतः ॥ २५९ ॥
अतो भागवतं ये ये बुधाः प्रामाणिकं विदुः ॥
प्रामाण्यं कपिलस्यामी मन्तुमर्हन्ति सर्व्वथा ॥ २६० ॥
ये पञ्चमेऽवतारे तु भगवान् कपिलोऽभवत् ॥
प्रोचे च सांख्यमित्येतदपि भागवते श्रुतं ॥ २६१ ॥

Digitized by Google

यथा १ स्कन्धे ३ अध्याये १० श्लोकः ॥

"षष्ठमः कपिलो नाम सिद्धेशः कालविप्लुतं ॥
प्रोवाचासुरये सांख्यं तत्त्वग्रामविनिर्णयम्" इति ॥ २६२ ॥
प्रामाण्ये कपिलस्येत्थं शास्त्रसिद्धान्तिते सति ॥
समं प्रामाण्यमुभयोः कपिलव्यासयो र्भवेत् ॥ २६३ ॥
मुनी प्रामाणिकावेतौ ये प्रावर्त्तयतां मते ॥
तयो र्मध्ये विपर्य्यायो महानस्तीत्यवादिषं ॥ २६४ ॥
तयो र्मध्ये तु तादृक्षो विपर्य्यायः प्रकाशते ॥
तयो र्यथार्थता नैव सम्भवत्युभयो र्बुध ॥ २६५ ॥
परन्त्वेकतरं विद्वन् तयो र्वेदान्तसांख्ययोः ॥
तत्त्वप्रतीपमित्येतत् स्वीकर्त्तव्यं न संशयः ॥ २६६ ॥
अतो यन्नोभयोः सम्यक् तयोः प्रामाण्यमुच्यते ॥
तच्छास्त्रं भ्रमशास्त्रमस्ति पौरुषेयस्य सर्वज्ञः ॥ २६७ ॥
तथाचात्यशास्त्रस्य प्रामाण्ये खण्डिते सति ॥
विद्वांसस्तत्र विश्वासं कर्त्तुं नार्हन्ति मर्मिकाः ॥ २६८ ॥
मतानि दर्शनोक्तानि क्रमशो जज्ञिरे यथा ॥
मतं पौराणिकं तद्वद् विविधं क्रमशोऽजनि ॥ २६९ ॥
ये सूक्ष्मबुद्धयो विज्ञा भारतेऽभोदयत्मत ॥
ते सांख्यन्यायवेदान्तान् स्वमत्या समकल्पयन् ॥ २७० ॥
तदूनबुद्धयस्त्वन्ये काव्यशक्तियुता बुधाः ॥
मतानि लोकबोधानि पुराणादिष्वकल्पयन् ॥ २७१ ॥

Digitized by Google

पुराणोपपुराणानां समयानां विचारतः ॥
अन्योन्यं मतभिन्नत्वं बहुधा तत्र दृश्यते ॥ २७२ ॥
शैवानि कानिचित् तेषां वैष्णवान्यपराणि तु ॥
अस्मिन् गरुडहये चाग्ने विशेषाः सन्ति भूरयः ॥ २७३ ॥
अतस्तान्याकराद् ग्राह्याद् एकस्माद् नोदमत्सत ॥
ग्रन्थैर्मन्थैस्तु भूयोभि र्थरथस्तेति बुध्यते ॥ २७४ ॥
परेश्वरस्य निःश्वासात् सर्वज्ञस्योदयादि यत् ॥
अंशेषु तस्य ग्राह्यस्य मिथो बाधो न सम्भवेत् ॥ २७५ ॥
प्रोक्तस्य सिद्धये विद्वन् खस्य वादस्य सम्मति ॥
इतिहासपुराणानां तत्त्वं वक्ष्यामि विस्तरात् ॥ २७६ ॥
सर्गो दिवौकसां वंशश्चरित्राणि च भूभृतां ॥
इत्यादयः पुराणानां विषयाः पञ्च कीर्त्तिताः ॥ २७७ ॥ यथा ॥
"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्" इति ॥
परन्त्वेतानि सर्वाणि पञ्च लक्षाणि केष्वपि ॥
पुराणेषु न दृश्यन्त इति तत्त्वारगा विदुः ॥ २७८ ॥
यस्मिन् यस्मिंश्च ये येऽर्थाः पुराणेऽन्तर्गता इति ॥
तत्तत्संक्षेपणं साम्ने पुराणे किञ्चिदुच्यते ॥ २७९ ॥
यानीदानीं पुराणानि प्रचलन्त्यत्र भौतले ॥
तन्मध्ये केषुचिद् साम्यसंज्ञितोऽर्थो न लभ्यते ॥ २८० ॥
साम्ने तत्तत्पुराणस्य श्लोकसंख्या च योच्यते ॥

Digitized by Google

कस्मिन्नधीयतो प्रायो नेच्छते पञ्चलक्षके ॥ २८१ ॥
भविष्यब्रह्मवैवर्त्तनामधेयपुराणयोः ॥
अर्थादिवर्णनं मात्स्ये पुराणे ह्येवमुच्यते ॥ २८२ ॥ यथा ॥
"यत्राधिकृत्य माहात्म्यमादित्यस्य चतुर्मुखः ॥
अघोरकल्पवृत्तान्तप्रसंगेन जगत्स्थितं ॥
मनवे कथयामास भूतग्रामस्य लक्षणं ॥
चतुर्दशसहस्राणि तथा पञ्चशतानि च ॥
भविष्यं चरितप्रायं भविष्यं तदिहोच्यते" इति ॥
पुनर्यथा ॥ "रथन्तरस्य कल्पस्य वृत्तान्तमधिकृत्य यत् ॥
सावर्णिना नारदाय कृष्णमाहात्म्यसंयुतं ॥
यत्र ब्रह्मवराहस्य चरितं वर्ण्यते मुहुः ॥
तदष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्यते" इति ॥
इदानीं यत् पुराणन्तु भविष्याख्यमवाप्यते ॥
तदन्तःस्था भविष्योक्तिः प्रायः क्वापि न लभ्यते ॥ २८३ ॥
एतर्हि ब्रह्मवैवर्त्तपुराणं यच्च दृश्यते ॥
तत्र प्रोवाच सावर्णिः किन्तु नारायणो मुनिः ॥ २८४ ॥
रथन्तरस्य कल्पस्य वृत्तान्तस्तत्र नास्ति च ॥
इत्यादि वर्त्तमानस्य पुराणस्येदानीं स्फुटं ॥ २८५ ॥
अतो यद्यत् पुराणेषु वक्तुं पूर्वमविद्यत ॥
तन्मध्ये बऊलं खुत्तमिति कैश्चन मन्यते ॥ २८६ ॥
चरित्रमार्थवंशानामादिमं जघटे यथा ॥

Digitized by Google

तथा यथातथं विद्वन् पुराणादिषु नोच्यते ॥ २८७ ॥
तद् आदिमं पुराणन्तमादौ ग्रन्थेष्वनर्पितं ॥
पितृणां प्रमुखात् पुत्रैः समाकर्ण्य क्रमात् क्रमात् ॥ २८८ ॥
यत् पूर्वेषां मुखादेवं पुराणन्तं निगम्यते ॥
तत् प्रायो विक्रियां विद्वन्नचिरेण प्रगच्छति ॥ २८९ ॥
यद् वृत्तं यौवने कोपि परवक्त्रात् निगम्यति ॥
सर्वं तद्विस्तरं पश्चात् सम्यक् स्मर्तुं न शक्यति ॥ २९० ॥
यदाच वार्द्धकं प्राप्य तत्कथां विवृणोति सः ॥
तदा स तात्त्विकीं वार्त्तां विकरोति स्मृते भ्रमात् ॥ २९१ ॥
इत्थं परम्पराप्राप्ताः पुराणकथा बुध ॥
तद्वक्तॄणां स्मृते र्दोषाद् जायन्तेऽन्यतमिश्रिताः ॥ २९२ ॥
अन्यख्यानवक्तारः पुराणप्रकीर्त्तने ॥
अत्युक्त्या प्रायशो राज्ञामसंकुर्वन्ति सद्गुणान् ॥ २९३ ॥
प्राचां राज्ञां चरित्राणि सूताः संसत्सवर्णयन् ॥
इत्येषा सर्वदा रीति र्भारते प्राचरत् पुरा ॥ २९४ ॥
पूर्वेषां भूभुजां श्लाघां श्रुत्वा तद्वंशसम्भवाः ॥
मही पालाः प्रसीदन्ति सत्कुर्वन्ति च मागधान् ॥ २९५ ॥
अन्यख्यात्यकृतार्थानां चरित्राणां निगमनात् ॥
दृढं सामान्यलोकानां जायते चित्तरञ्जनं ॥ २९६ ॥
अतस्तोषाय भूपानां लोकचित्तप्रसादनाय च ॥
अवान्तरीः कथाः सूताः पुराणेष्वमिश्रयन् ॥ २९७ ॥

Digitized by Google

इत्थं परम्परायातां सूतवक्त्रैरिरावधि ॥
कथानां संहिता ब्रह्मे विभज्यिद्भिरदश्यत ॥ २९८ ॥

तथा च विष्णुपुराणे उक्तं ॥

"आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ॥
पुराणसंहितां चक्रे पुराणार्थविशारदः ॥" इति

परन्तु संहिता बादृक् पुराणानामभूत् पुरा ॥
इदानीं तादृशी विद्वन् वर्त्तमाना न दृश्यते ॥ २९९ ॥

ग्लानै र्मतेषु मूलेषु व्यायमानेषु भारते ॥
विकारो विविधस्तादृक् पुराणेष्वप्यजायत ॥ ३०० ॥

इदानीं सात्त्विकादीनां प्रभेदेन त्रिधात्मकः ॥
विभागः क्रियते तेषां पाद्ममात्स्यपुराणयोः ॥ ३०१ ॥

तन्मध्ये सात्त्विकानीति खण्डितानि महाप्रभ ॥
विष्णोः सर्वाधि माहात्म्यं कीर्त्तयन्ति विशेषतः ॥ ३०२ ॥

द्वितीयस्तदृशो विद्वन् तामसो योऽभिधीयते ॥
तदन्तरे महादेवो विशेषेण प्रशंस्यते ॥ ३०३ ॥

अन्यच्च राजसाख्येषु पुराणेषु विशेषतः ॥
माहात्म्यं ब्रह्मणस्यास्य देवीनां वा प्रकीर्त्यते ॥ ३०४ ॥

तन्मध्ये केषुचिद् विष्णोः परमात्मत्वमुच्यते ॥
अन्येषु परमात्मत्वं महादेवस्य कथ्यते ॥ ३०५ ॥

किन्तु स्वयं तयोरेकः परमात्मेति यन्मतं ॥
तत् पूर्वं भारते नासीन् न ब्रह्मस्तदपश्यत ॥ ३०६ ॥

Digitized by Google

यदा ह्यग्न्यादिदेवानां वैदिकानां बभूवुरुत्तमाः ।
तदा महादरं प्राप्तु ब्रह्मविष्णुमहेश्वराः ॥ २०७ ॥
कथं प्राधान्यमेतेषां मन्वन्तरेष्वभूदिति ।
इत्येतत् साध्यतं सम्यग् विनिश्चेतुं न शक्यते ॥ २०८ ॥
अतीतेषूपनिषद्वेकमेव विश्वस्य कारणं ।
ब्रह्मादिनामभिर्विदन् प्रायः सर्वत्र गद्यते ॥ २०९ ॥
यत्तु वह्वृचोऽप्येकं ब्रह्म रुद्रादिसाधने ।
अवस्थात्रयमादत्ते इति विघ्नैरमन्यत ॥ २१० ॥
मतास्तु देववत् तर्हि ब्रह्मविष्णुमहेश्वराः ॥
सर्गादिसाधका मन्वन्तरभक्ता बुधैस्ततः ॥ २११ ॥
ब्रह्मा कर्ता हरिर्भर्ता संहर्ता च महेश्वरः ॥
इति त्रयः परा देवाः सन्ति शास्त्रेषु कीर्तिताः ॥ २१२ ॥
एवं रामायणे तेषां त्रयाणां महिमोच्यते ॥
प्रायश्च भारते तेषां सर्वेषां दृश्यतेऽर्चना ॥ २१३ ॥
क्रमात्तु वेधसः शैवा लोके प्राधान्यमुद्यताः ॥
लोके च वह्वधेऽत्यन्तं महिमा हरिरुद्भवोः ॥ २१४ ॥
पुराणपारदृश्वेतद् येन रूपेण साध्यते ॥
सर्वं तद्विस्तरं विद्वन् मम वक्त्राद् निशामय ॥ २१५ ॥
केचित् बुधा विदेशीया महाभारतवेदिनः ॥
कांश्चित् तदन्विनः स्वल्पान् नूत्नान् आऽऽ विचारज्ञात् ॥२१६
यत् तत्र भारते प्रायः सर्वत्र प्राप्यते मतं ॥

Digitized by Google

तस्य प्रतीयमन्यत्र दृश्यतेऽन्यन्मतं क्वचित् ॥ २१७ ॥
खण्डा मिथो विरुद्धार्थास्ते नैकस्मिन्मतेऽसि ॥
ज्ञाताः पूर्वापराक्षित्यं तत्त्वज्ञैरनुमीयते ॥ २१८ ॥
मतं तु प्राक्तनत्वेन ज्ञातं यत्र विलोक्यते ॥
स ग्रन्थो बुध्यते खण्डो यत्र नूनं स नूतनः ॥ २१९ ॥
ज्ञप्तस्य परमात्मत्वं येषु खण्डेषु कथ्यते ॥
ते खण्डाः सकला नूना निर्धीयन्ते विचारिभिः ॥ २२० ॥
यस्मादेतन्मतोद्भूतो भारतेऽन्यत्र गाप्यते ॥
एतच्च मतमन्येभ्यो मतेभ्यो भाति नूतनं ॥ २२१ ॥
तस्माच्च यत्र ज्ञप्तस्य परब्रह्मत्वमुच्यते ॥
सा ख्याता भगवद्गीता नूतनाऽस्तीति बुध्यते ॥२२२ ॥
आदौ बुधैर्बदाऽऽरि महाभारतसंहिता ॥
तदा सा भगवद्गीता तदन्तर्न व्यरच्यत ॥ २२३ ॥
यदा पश्चात्तु ज्ञप्तस्य वर्द्धते महिमा भुवि ॥
तदा गीतां बुधाः ज्ञात्वा संहितायाममेलयन् ॥ २२४ ॥
विष्णोश्च यत्र रामादिष्ववतारः प्रकीर्त्यते ॥
रामायणस्य तं सर्गं नूनं केचिद् बुधा विदुः ॥ २२५ ॥
विचारचक्षुषा विद्वन् पुराणस्य दर्शनात् ॥
यद् रामज्ञप्तयोस्तत्त्वं प्रतिभाति तदुच्यते ॥ २२६ ॥
अयोध्याभूमिपो रामः कश्चिदासीच्चिरन्तनः ॥
प्रतापी दिग्विजेता च तत्र शंका न विद्यते ॥ २२७ ॥

Digitized by Google

ज्ञात्वा मथुरानाथः बान्धवानां सहायतां ।
महायुद्धेऽकरोदित्यं पुराऽऽत्मात् प्रक्षिप्यति ॥ २२८ ॥
गुणैः शौर्येण वा लोके तावुभौ कीर्तिमाप्नुतः ॥
तयो र्देवत्वबुद्धिस्तु न कर्त्तव्या मनीषिभिः ॥ २२९ ॥
अत्युक्त्या तच्चरित्राणि कीर्त्तयन्तः कविव्रजाः ॥
ग्रनैः ग्रनैस्तयोः ख्यातिं लोकेऽत्यन्तमवर्द्धयन् ॥ २३० ॥
तयोश्च वास्तवी वार्त्ता यदा लोको विसस्मरे ॥
तदा तौ देववद् मन्तुं मुग्धाः प्रारभिरे जनाः ॥ २३१ ॥
यावद् गुणी पुमान् कोऽपि वर्त्ततेऽत्र महीतले ॥
तावत् तद्देवतावुद्धिं कर्तुं लोका न ग्रमुयुः ॥ २३२ ॥
यतो मनुष्यवद् नित्यमाचरन्तं न देववत् ॥
लोकास्तं सकलाः साक्षाद् विलोकन्ते दिने दिने ॥ २३३ ॥
यदा तु भूतजालुग्नः परलोकं ययावसौ ॥
तदा मिथ्याकथोत्पत्तिरमुद्दिश्य सम्भवेत् ॥ २३४ ॥
यदार्थः प्राज्ञनो विद्वन् भुवि यः कोपि दृश्यते ॥
तं लोकाः सर्वदेशीया आद्रियन्ते स्वभावतः ॥ २३५ ॥
ग्रतश्च ये गुणै र्मर्त्या लोके प्राप्तमहोन्नतिं ॥
जनैः पश्चाद्भवैस्तेषामादरः क्रियते महान् ॥ २३६ ॥
देवत्वहीनयो र्यद्वद् भारते रामकृष्णयोः ॥
देवत्वबुद्धिरत्येदे तथाऽन्येषां नृणामपि ॥ २३७ ॥
सुरा ह्यांग्रेन भूमक्षुवीरयोर्दृष्ट्वावतरन् ॥

Digitized by Google

इत्यादौ कथ्यते विद्वन् महाभारतपर्वणि ॥ २२८ ॥
वेदस्य विस्तरं विद्वन् स्वयं निश्चेतुमिच्छसि ॥
अंशावतरणाभिख्यः सर्गस्तस्मिं विलोक्यतां ॥ २२९ ॥
अन्यच्चैतादृशत्युक्तिः सदा भारतगीयते ।
अज्ञानमात्रसम्भूता प्रपञ्चाख्य निरन्तरं ॥ २३० ॥
सुख्याते शंकराचार्ये कपिले च महामुनौ ॥
अवातारीत् स्वयं विष्णुरित्याद्यः शास्त्रकारिकः ॥ २३१ ॥
इदानीमपि देशेऽस्मिन् क्वचु प्रेतेषु केषुचित् ॥
अपौरुषेयमाहात्म्यं लोकैरारोप्यते मुधा ॥ २३२ ॥
मुहम्मदानुगाः केचिदेतद्देशनिवासिनः ॥
पीरेतिसंज्ञया ख्याता विभ्रमन्ते क्वचित् क्वचित् ॥ २३३ ॥
पुरस्कृत्याधिकेन ये तेषां प्रसिध्यत्यत्र गीयते ॥
पुष्पोत्सर्गादिना तेषां लोकाः कुर्वन्ति पूजनं ॥ २३४ ॥
श्रद्धया तेषां मृतासूनां रोगिसुस्थीकृतिर्भवेत् ॥
इत्यादिर्महिमा तेषु निष्ठो मूर्खैः श्रद्धीयते ॥ २३५ ॥
पूर्वावधद्यपर्यन्तमित्थं भारतगीयते ॥
क्वचां दैवीकृते मोघा रीतिः प्रत्यक्ष विलोक्यते ॥ २३६ ॥
पूर्वं न प्राचलत् पूजा केषुचस्थात्र भारते ॥
इत्यस्य सिद्धये विद्वन् प्रमाणान्तरमुच्यते ॥ २३७ ॥
प्राग् विक्रमार्कशाकादेरब्दपञ्चशतान्तरे ॥
स्थिते बौद्धस्य धर्मस्य प्रारम्भो भारतेऽभवत् ॥ २३८ ॥

Digitized by Google

यान् यान् वेदानुगा देवान् आश्रियन्त तदातनाः ॥
तदुद्देशस्तु बौद्धानाम् आदिसूत्रेषु लभ्यते ॥ ३४९ ॥
हरिर्नारायणो ब्रह्मा वरुणः शंकरः शिवः ॥
कुबेरो वासवः शक्रः कथ्यन्ते तत्र देववत् ॥ ३५० ॥
यावन्ति त्वादिसूत्राणि बौद्धानामधुनावधि ॥
दृष्टानि तत्र तद्दृष्ट्वा नाम कृष्णस्य नेक्षितं ॥ ३५१ ॥
चेत् कृष्णस्यार्चना तस्मिन् प्राचलिष्यदनेहसि ॥
तदा स किन्न बौद्धेषु तेषु सूत्रेष्ववक्ष्यत ॥ ३५२ ॥
अतः सूत्राण्यरच्यन्त तानि यस्मिन्ननेहसि ॥
तदानीं विश्रुता नासीत् कृष्णपूजेति तर्क्यते ॥ ३५३ ॥
सूत्रेष्वन्येषु बौद्धानामदृष्टेष्वधुनावधि ॥
स्यान्नाम केशवस्योक्तमिति कश्चिद् बुधो वदेत् ॥ ३५४ ॥
तत्राहमुत्तरं दद्यां चेदेवं मन्यते भवान् ॥
तदा सूत्रोक्तिमन्विष्य तादृशीं दर्शयेदिति ॥ ३५५ ॥
छान्दोग्योपनिषत्कारो बुधः कश्चिद् चिरन्तनः ॥
कृष्णस्य देवकीसूनो र्घोरादिष्टत्वमुक्तवान् ॥ ३५६ ॥ यथा ॥
'तद्धैतद् घोर आङ्गिरसः कृष्णाय देवकीपुत्रायोक्त्वोवाच' इत्यादि
परन्त्वस्मिन् स्थले कृष्णो देवत्वेन न कथ्यते ॥
न वा प्रयुज्यते शब्दस्तदीयादरवाचकः ॥ ३५७ ॥
छान्दोग्योपनिषद् यस्मिन् काले ऽकारि चिरन्तने ॥
तदा स देवकीसूनुः ख्यातोऽभूदिति बुध्यते ॥ ३५८ ॥

Digitized by Google

तद्देवतस्य बुद्धिस्तु कर्त्रे न प्राधवत् तदा ॥
इत्यादरार्थनिर्देशिस्तच्छब्दाभावात् प्रतीयते ॥ ३५९ ॥
यदाह कृष्णमुद्दिश्य महाभारतकारकः ॥
आवाभ्यां साध्यतं विद्वन् दृश्यतां तस्य विक्रमः ॥ ३६० ॥
तस्य युद्धादिकार्य्येषु प्रवृत्तिर्यत्र कथ्यते ॥
स तत्र मर्त्यवत् प्राय आचरन्निति वर्ण्यते ॥ ३६१ ॥
युद्धेषु खस्य रक्षायै शत्रूणां नाशनाय वा ॥
स प्रायो दैविकीं शक्तिं प्रयुञ्जानो न दृश्यते ॥ ३६२ ॥
पुनः समासहस्राणि नानातीर्थेषु दुष्करं ॥
तपः स तप्तवानित्थं वनपर्वणि कथ्यते ॥ ३६३ ॥
पुनः खर्लेष्वनेकेषु भारते तत्र केशवः ॥
ऋषिर्नारायणो ऽसीति प्रोक्तमस्ति महात्मभिः ॥ ३६४ ॥

यथा कृष्णेनोक्तं ॥

"त्वं चैवाहं च कौन्तेय नरनारायणौ स्मृतौ" इति ॥
पुनः शिवार्चको भूत्वा तं सखीकं प्रसाद्य च ॥
कृष्णो वरानवापेत्थं दानधर्मे प्रकीर्त्यते ॥ ३६५ ॥
भूयः कृष्णो हरेरंशः प्रोच्यते तत्र भारते ॥
भूयश्च परमात्मत्वं तस्य तत्रैव कथ्यते ॥ ३६६ ॥
कृष्णः कृष्णाद् हरेः केशादेकशृङ्गादुदायत ॥
इत्यादौ प्रोच्यते विद्वन् महाभारतपर्वणि ॥ ३६७ ॥ यथा ॥

Digitized by Google

व्यास उवाच ॥

"तैरेव सार्द्धन्तु ततः स देवो जगाम नारायणमप्रमेयं ॥
अनन्तमव्यक्तमजं पुराणं सनातनं विश्वमनन्तरूपं ॥ ६३०६ ॥
स चापि तद्वदधात्मर्व्वमेव ततः सर्व्वे संबभूवुर्हरर्क्षां ॥
सचापि केशौ हरिरुद्धवर्ण शुक्लमेकमपरं चापि कृष्णं ॥३३०७
तौचापि केशौ निविशेतां यदूनां
कुले स्त्रियौ देवकीं रोहिणीं च ॥
तयोरेको बलदेवो बभूव
योऽसौ श्वेतस्तस्य देवस्य केशः ॥
कृष्णो द्वितीयः केशवः सम्बभूव
केशो योऽसौ वर्णतः कृष्ण उक्तः" ॥ ६३०८ ॥

यथाच भारते केशात् कृष्णस्योत्पत्तिरुच्यते ॥
तथाऽऽह वैष्णवाभिख्ये पुराणेऽपि पराशरः ॥ ३६८ ॥ यथा
"एवं संस्तूयमानस्तु भगवान् परमेश्वरः ॥
उज्जहारात्मनः केशौ सितकृष्णौ महामुने ॥
उवाच च सुरानेतौ मत्केशौ वसुधातले ॥
अवतीर्य भुवो भारक्लेशहानिं करिष्यतः ॥
सुराश्च सकलाः खांशैरवतीर्य महीतले ॥
कुर्वन्तु युद्धमुन्मत्तैः पूर्वोत्पन्नैः महासुरैः ॥
ततः क्षयमशेषाणां दैतेया धरणीतले ॥
प्रयास्यन्ति न सन्देहो मदुत्पातविचूर्णिताः ॥

Digitized by Google

वसुदेवस्य या पत्नी देवकी देवतोपमा ॥
तस्यामष्टमो गर्भो मत्तेजो भविता सुराः ॥
अवतीर्य च तत्रायं कंसं घातयिता भुवि ॥
कालनेमिसमुद्भूतमित्युक्ताऽन्तर्दधे हरिः" इति ॥
अस्तोत्रयत्ततो विष्णुं देवमानवोद्भवः स्तुतः ॥
गीतायां तस्य छाया स्य परमात्मत्वमुच्यते ॥ ३६९ ॥

यथा भगवद्गीतायाम् अर्जुन उवाच ॥

"परं ब्रह्म परं धाम पवित्रं परमं भवान् ॥
पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं ॥
आहुस्त्वामृषयः सर्वे देवर्षि नारदस्तथा ॥
असितो देवलो व्यासः स्वं चैव ब्रवीषि मे" इति ॥
यथा च भारते विष्णुं मत्तोऽन्यं न प्रशस्यते ॥
तथा भूयः पुराणेषु मत्तोनान्यमीक्षते ॥ ३७० ॥
तथा हि ब्रह्मवैवर्तपुराणे नूतनोऽर्चना ॥
सराधावाचछायास्तु विष्णोरेव प्रदिश्यते ॥ ३७१ ॥
यथा वाचस्य छायास्य महिमा तत्र दृश्यते ॥
तथाऽन्येषु पुराणेषु नेक्ष्यते वैष्णवादिषु ॥ ३७२ ॥
तथाच छायामुद्दिश्य विविधा मतविक्रिया ॥
जज्ञे घनैः घनैरित्थं भाति ब्रह्मपरीक्षणात् ॥ ३७३ ॥
यत्काले यन्मतं जातं प्रचचाराच भारते ॥
तदा तत्पोषकं नूनं शास्त्रं जज्ञे तदेकृभिः ॥ ३७४ ॥

Digitized by Google

शैवानां वैष्णवानाञ्च स्वं स्वं देवं प्रशंसतां ॥
मिथो द्वेषः पुराणेषु यादृग् भात्यथ तद् ब्रुवे ॥ ३७५ ॥
या दक्षयज्ञनाशस्य कथा शास्त्रेषु कथ्यते ॥
ततः प्राग् वैष्णवान् शैवा अरन्धन्निति बुध्यते ॥ ३७६ ॥
विष्णोः शिवस्य वा पक्षं गृहीत्वा तत्तदर्चकाः ॥
महिम्ने स्वस्वदेवस्य पुराणादीन्यकल्पयन् ॥ ३७७ ॥
तन्मध्ये केषुचिद् विष्णुः पुराणेषु प्रशस्यते ॥
आक्रोशः शिवभक्तानां क्रियते च क्वचित् क्वचित् ॥ ३७८ ॥
चेत् पाद्मस्योत्तरं खण्डं पुराणस्य भवान् पठेत् ॥
तदा विष्णवर्चनापुष्टिमत्यन्तां तत्र वेत्स्यति ॥ ३७९ ॥
अशेषं विष्णुपूजाया विष्णुभक्तेश्च विस्तरं ॥
तत्खण्डे पार्वतीं रुद्रो बोधयन्निति कथ्यते ॥ ३८० ॥
समाप्ते तर्हि रुद्रेण विष्णुमाहात्म्यकीर्त्तने ॥
तौ पार्वतीशिवौ विष्णु मार्चतामित्यमुद्यते ॥ ३८१ ॥
पुन र्देवत्रयस्यैको हरिरादरमर्हति ॥
इत्येकदा भृगुः प्रोचे यथा तत्रैव कथ्यते ॥ ३८२ ॥

यथा पाद्म उत्तरखण्डेऽन्तिमाध्याये भृगुरुवाच ॥

"रजस्तमोगुणोद्रिक्तौ विधीशानौ सुरोत्तमौ ॥
शैनौ मया न पूज्यौ तौ विप्राणान्द्विसत्तमाः ॥
शुद्धसत्वमयोविष्णुः कल्याणगुणसागरः ॥
नारायणः परं ब्रह्म विप्राणां दैवतं हरिः" इति ॥

Digitized by Google

पुन भागवते विदन् स्वयं ब्रह्मा प्रजापतिः ॥
ईदृक्षैर्वचनै र्विष्णुं प्रशंसन्निति कथ्यते ॥ १८३ ॥
यथा २ स्कन्धे ६ अध्याये ॥ ब्रह्मोवाच ॥
"नाहं न यूयं यदतां गतिं विदु
र्न वामदेवः किमुतापरे सुराः ॥
तन्मायया मोहितबुद्धयस्त्विदं
विनिर्मितं चात्मसमं विचक्ष्महे ॥ १६ ॥
यस्यावतारकर्माणि गायन्ति ह्यस्मदादयः ॥
न यं विदन्ति तत्त्वेन तस्मै भगवते नमः" ॥ १७ ॥ इत्यादिना
पुनः पद्मपुराण उत्तरखण्डे ब्रह्मोवाच ॥
"व्यापकोऽयं सदा विष्णुः परमात्मा सनातनः ॥
अनादिनिधनः श्रीमान् भूतात्मा भूतभावनः ॥
यस्मादहं हि संजातः सोयं विष्णुः सदावतु ॥
सोऽयं कालस्य कालो वै सोऽयं मम तु पूर्वजः" ॥
पुन यथा ॥ "स पिता जनिताऽस्माकं कीर्त्यते मधुसूदनः" ॥
अन्येषु लैंगकौर्मादिपुराणेषु महाप्रभु ॥
तुच्छत्वेनोच्यते विष्णुः प्राधान्येन महेश्वरः ॥ १८४ ॥
प्रधानत्वार्थमेकेषु जल्पन्तो हरिवेधसौ ॥
प्रादुर्भूय महालिंगमग्निरूपमलक्ष्यत् ॥ १८५ ॥
ततस्तल्लिंगमाहात्म्यदर्शनाद् हरिवेधसौ ॥
महेश्वरमार्चतामित्थं पुराणे लैंग उच्यते ॥ १८६ ॥

Digitized by Google

यथा विष्णुपुराणस्य १७ अध्याये ॥

"आवयोरभवद्युद्धं सुघोरं रोमहर्षणं ॥
प्रलयार्णवमध्ये तु रजसाद्यैरयोः ॥
एतस्मिन्नन्तरे विष्णुमभवद्भावयोः पुरः ॥
विवादशमनार्थञ्च प्रबोधार्थञ्च भास्वरं ॥
ज्वालामालासहस्राढ्यं कालानलशतोपमं ॥
क्षयवृद्धिविनिर्मुक्तमादिमध्यान्तवर्जितं ॥
अनौपम्यमनिर्देश्यमग्र्यं विश्वसम्भवं ॥
तस्य ज्वालासहस्रेण मोहितो भगवान् हरिः ॥
मोहितं प्राह मामत्र परीक्षावोभिसम्भवं ॥
अधो गमिष्याम्यनलस्तम्भस्यानपमस्य च ॥
भवानूर्द्धं प्रयत्नेन गन्तुमर्हति सत्वरः ॥
एवं व्याहृत्य विश्वात्मा स्वरूपमकरोत्तदा ॥
वाराहमहमप्येवं हंसत्वं प्राप्तवान् सुराः ॥
एवं वर्षसहस्रन्तु त्वरन्विष्णु रधो गतः ॥
नापश्यदल्पमप्यस्य मूलं विष्णुस्य शूकरः ॥
तावत् कालं ततोऽत्यूर्द्धं महमप्यरिसूदनाः ॥
सत्वरं सर्व्वयत्नेन तस्यान्तं ज्ञातुमिच्छया ॥
श्रान्तो न दृष्ट्वा तस्यान्तमहमूर्द्धादधोगतः ॥
तथैव भगवान्विष्णुः श्रान्तः सव्रस्तलोचनः ॥
सर्व्वदेवभवस्तूर्ण्णं मुत्थितः स महावपुः ॥

Digitized by Google

समागतो मया सार्द्धं प्रविपत्य भयान्मुहुः ॥
मायया मोहितः शम्भोस्तस्थौ संविग्नमानसः ॥
पृष्ठतः पार्श्वतश्चैव चाग्रतः परमेश्वरं ॥
प्रविपत्य मया सार्द्धं सस्मार किमिदं किमिति ॥
तदा समभवत्तत्र सनादं शब्दलक्षणं ॥
ओं ओमिति सुरश्रेष्ठाः सुव्यक्तं श्रुतलक्षणं ॥
किमिदं किमिति सञ्चिन्त्य मया तिरुन्महास्वनं ॥
त्रिकूस्थ दक्षिणे भागे तदापश्यत् सनातनम्" इत्यादि ॥

पुनर्यथा ॥

"पद्मसंस्थं तथा लब्ध्वा जजाप भगवान् हरिः ॥
अथ दृष्ट्वा कलावर्णं ऋग्यजुःसामलक्षणं ॥
ईशानमीशमुकुटं पुरुषाख्यं पुरातनं ॥
अघोरहृदयं हृद्यं वामगुह्यं सदाशिवं ॥
सद्यपादं महादेवं महाभोगीन्द्रभूषणं ॥
विश्वतः पादवदनं विश्वतोक्षिकरं हरं ॥
ब्रह्मणोधिपतिं सर्गस्थितिसंहारकारणं ॥
तुष्टाव पुनरिष्टाभिर्वाग्भिर्वदनमीश्वरम्" इति ॥
पुनः पुराणकर्त्तारः खलदेवासुरोधिनः ॥
मिथो भेदेन कुर्वन्ति तत्तदालयवर्णनं ॥ ३८७ ॥
वैकुण्ठमन्यलोकेभ्य ऊर्द्ध वर्त्तीति वैष्णवः ॥
पुराणकारकः पाद्मे पुराणे समुदाहरत् ॥ ३८८ ॥

Digitized by Google

पुनश्च ब्रह्मवैवर्तपुराणे ब्रह्मखण्डे

त्रयोदश एव लोकानां मध्ये ऊर्द्धतमः कृतः ॥ ३८९ ॥

परन्तु शैवयो र्विद्वन् शिवधर्मपुराणयोः ॥

ऊर्द्धस्थः सर्वलोकेषु शिवलोक इतीर्य्यते ॥ ३९० ॥

शैवानां वैष्णवानाञ्च मिथो योऽस्ति विपर्य्ययः ॥

अयं तत्साधकै र्वाक्यैः स हि लोके प्रसिध्यति ॥ ३९१ ॥

अत् लेखाङ्कित् पुराणानां नवीनत्वमवादिषं ॥

एतस्य सिद्धये विद्वन् प्रमाणान्तरमुच्यते ॥ ३९२ ॥

वाराणस्यादितीर्थानां महिमा यत्र कीर्त्तितः ॥

पुराणेष्वीदृशाः खण्डा विलोक्यन्ते सुभूरयः ॥ ३९३ ॥

येषां तु तत्र तीर्थानां नाना माहात्म्यमुच्यते ॥

नूनानि कानिचित्तेषामिति तत्त्वविदो विदुः ॥ ३९४ ॥

परन्तु येषु नूनानां तीर्थानां महिमा कृतः॥

अमी पौराणिकाः खण्डा नूना स्युरिति सिध्यति ॥ ३९५ ॥

यद् उत्कलेऽस्ति सुख्यातं जगन्नाथस्य मन्दिरं ॥

आ तस्य निर्मितेः प्रायः षट्शताब्दान्तरं गतं ॥ ३९६ ॥

तदीयनिर्मितेः कालो यो निर्णीतस्तथा मया ॥

स वाक्याद् ग्रन्थकारस्य विश्वास्यस्य प्रतीयते ॥ ॥ ३९७ ।

तीर्थानामुत्कलस्थानां महिमा यत्र गद्यते ॥

तत्रैतन्मन्दिरं ब्राह्मे पुराणे परिकीर्त्तितं ॥ ३९८ ॥

अतस्तत्कीर्त्तनाद् विद्वन् मन्दिरस्य कृतेरत्र ॥

Digitized by Google

तदादिमः पुराणस्य इति भूतेति बुध्यते ॥ ३९९ ॥
श्रीरंगश्रीकठाद्रिस्थदेवमन्दिरकीर्तनात् ॥
तथा पाद्मस्य नूनत्वं पुराणस्य प्रतीयते ॥ ४०० ॥
ये ये खण्डाः पुरस्तेषु दृश्यन्ते तीर्थसंस्तवाः ॥
तदुत्पत्तिः प्रकारेण वक्तव्यत्वेन मन्यते ॥ ४०१ ॥
सुख्यातिं खलतीर्थस्य सदा तीर्थबुभूषवः ॥
यत्नेन वर्धयन्तीति लोके सर्वत्र दृश्यते ॥ ४०२ ॥
यदा कस्यापि तीर्थस्य कीर्तिं देवमवर्धत ॥
तदा तत्पोषकः खण्डः पुराणान्तरमेत्यत ॥ ४०३ ॥
किञ्चामुष्मेऽमुको देवः स्थाने प्रादुरभूदिति ॥
तत्स्थानपुण्यतासिद्धौ प्राकल्प्यन्त कथा बुधैः ॥ ४०४ ॥
अन्यच्च भारतात् प्रच्याद्भूद् भागवतं ततं ॥
इत्येतत् सूचयत्येषा कथा भागवतोदिता ॥ ४०५ ॥
श्रुत्वा सूताद्विबोधाय महाभारतसंहितां ॥
तया सम्यङ् न सन्तुष्य व्यासश्चिन्ताकुलोऽभवत् ॥ ४०६ ॥
दिवस्ततोऽवरूढेन विप्रेण नारदेन सः ॥
पुनर्भागवतं चक्रे इति भागवते स्तुतं ॥ ४०७ ॥

यथा भागवते १ स्कन्धे ४ अध्याय उक्तं ॥

"इति भारतमाख्यानं कृपया मुनिना कृतं ॥ २५ ॥
एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ॥
सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः ॥ २६ ॥

Digitized by Google

नातिप्रसीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥
वितर्कयन् विविक्तस्थ इदं प्रोवाच धर्मवित्" इति ॥२७॥
तस्माच्च भारतोत्पत्तेः पश्चाद् भागवतोद्भवः ॥
बभूवेत्येवमाभाति खलु भागवतोक्तितः ॥ ४०८ ॥
वस्तुतो वोपदेवेन मुग्धबोधाख्यकारिका ॥
श्रुतं भागवतं केचिदाहुरत्यर्थपण्डिताः ॥ ४०९ ॥
इत्यादिकेन रूपेण पुराणानां परीक्षणात् ॥
तेषां पूर्वापरोत्पत्तिरप्रामाण्यं च सिध्यति ॥ ४१० ॥
पुराणकारिणे यस्मै मतं यादृगरोचत ॥
स तत्सृष्टिं स्वया बुध्या पुराणे स्वल्पतेऽकरोत् ॥ ४११ ॥
केचित् पुराणकर्त्तारः स्वमतस्थापनं दृढं ॥
कुर्वाणाः परशास्त्राणामपि कुर्वन्ति दूषणं ॥ ४१२ ॥
तन्मध्ये ब्रह्मवैवर्त्तपुराणस्य प्रणायकः ॥
वेदादिसर्वशास्त्राणां भ्रमशीलत्वमुक्तवान् ॥ ४१३ ॥

यथा ब्रह्मवैवर्त्तपुराणस्य प्राक्प्रकृतिखण्डस्थाः श्लोकाः ॥

"भगवन् यत् त्वया पूर्वं श्रुतं सर्वमभीप्सितं ॥
सारभूतं पुराणेषु ब्रह्मवैवर्त्तमुत्तमम् ॥
पुराणोपपुराणानां वेदानां भ्रमभञ्जनम् ॥
हरिभक्तिप्रदं सर्वं तत्त्वज्ञानविवर्द्धकं ॥
कामिनां कामदं चेदं मुमुक्षूणाञ्च मोक्षदम् ॥
भक्तिप्रदं वैष्णवानां कल्पवृक्षस्वरूपकम्" इति ॥

Digitized by Google

मतान्येतर्हि भूरीणि शास्त्राणि भारते ॥
सामान्यपुरुषेष्टानि प्रचलन्तीति दृश्यते ॥ ४१४ ॥
तन्मध्ये कानिचिद् विद्वन् शास्त्राण्यैरव्यवर्जनैः ॥
जनैः प्रवर्त्तितान्यासन्निति लोके प्रसिध्यति ॥ ४१५ ॥
शास्त्राणि नूनानि खानि खानि मतानि ते ॥
स्वमत्या कल्पयामासुरिति नास्त्यत्र संशयः ॥ ४१६ ॥
स्वमत्याऽऽधुनिका लोकाः कल्पयन्ति पथो यथा ॥
तथाऽग्रे शास्त्रकर्त्तारः पथो नूतनकल्पयन् ॥ ४१७ ॥
मतं वेदत्यजो बौद्धो नूनं मद्दत्कल्पयत् ॥
स्वमत्या मतवाऽऽख्यं चक्रुर्वेदधृतस्तथा ॥ ४१८ ॥
चैतन्यो वल्लभाचार्य्यस्तथारामानुजादयः ॥
सर्वे मतानि नूतानि स्वया प्रावर्त्तयन् धिया ॥ ४१९ ॥
वर्षर्त्तावुर्व्वरा यद्वद् नाना सूते तृणादिकं ॥
तथैवात्यविद्वद्धी र्नानाशास्त्रप्रसूरभूत् ॥ ४२० ॥
आद्यासानेहसो विद्वन्नद्य यावत् कदापि न ॥
शास्त्राणां कल्पने बुद्धि र्विरराम विपश्चितां ॥ ४२१ ॥
केचिद् निगूढतर्केषु तत्पराः सूक्ष्मबुद्धयः ॥
षड्दर्शनादिशास्त्राणि विज्ञबोध्यान्यकल्पयन् ॥ ४२२ ॥
अन्ये तु देवसेवायां प्रीयमाणा विपश्चितः ॥
पुराणादीनि देवानां प्रशंसार्थमकुर्वत ॥ ४२३ ॥
तच्छास्त्रापौरुषेयत्वसाधनार्हो महाशय ॥

Digitized by Google

मया प्रमाणलेशोऽपि तद्विचारान्न लभ्यते ॥ ३२४ ॥
खमत्या सुधियोऽन्यत्याः सर्वशास्त्राणि चक्रिरे ॥
इत्यस्य साधकं विदन् प्रमाणान्तरमुच्यते ॥ ३२५ ॥
पुरा ज्योतिर्विदोऽन्यत्याः पेशला भास्करादयः ॥
सिद्धान्तनामकान् ग्रन्थान् खविद्यायामकल्पयन् ॥ ३२६ ॥
मतानि तत्र ते खानि खानि प्रोच्य यथामति ॥
तत्तत्सिद्धायचेष्टन्त प्रमाणै र्युक्तिरूपिभिः ॥ ३२७ ॥
मिथो विपर्ययस्तेषु नानारूपो विलोक्यते ॥
एकोऽन्यस्य यथाशक्ति मतं खण्डितुमीहते ॥ ३२८ ॥
यत् साम्प्रतं विदेशीया बुधा भावर्त्तनात्मकं ॥
मतं धरन्ति तत् पूर्वमार्य्यभट्टोऽप्यमन्यत ॥ ३२९ ॥ यथा ॥
"भपञ्जरः स्थिरो भूरेवाहत्याहत्य प्रातिदैवसिकौ
उदयास्तमयौ सम्पादयति नक्षत्रग्रहाणाम्" इति ॥
असौ तु यन्मतं तथ्यं खमत्या निरधारयत् ॥
तद् ब्रह्मगुप्तनामाऽन्यो बुधः खण्डितुमैहत ॥ ३३० ॥
भूम्याकारप्रमाणादिविषये भास्करादयः ॥
नाना मतानि शास्त्रोक्तिविपरीतान्यतिष्ठिपन् ॥ ३३१ ॥
कूर्मस्य पृष्ठगा किंवा शेषाधारवती मही ॥
इत्याद्यविद्यया प्रोचुः पक्षलक्षणकारिणः ॥ ३३२ ॥
खमत्या तु प्रमाणेच्छुस्तत्त्वमन्विष्य भास्करः ॥
वसुन्धरां निराधारां गोलाकाराञ्च भावते ॥ ३३३ ॥ यथा ॥

Digitized by Google

"भूमेः पिण्डः प्रशाम्यन्नवविरविकुजेज्यार्किनक्षत्रकक्षा
दृष्टेर्वृत्तो हृतः सन् खदनिखखखिखखोमतेजोमयोऽयं ॥
नान्याधारः खशक्त्यैव वियति नियतं तिष्ठति" इत्यादिना ॥
अपिच ॥ "मूर्त्तो धर्त्ता चेद् धरित्र्याखदन्यखखाप्यनोखैवम
नानवस्था ॥
अन्ये अवया चेत् खशक्तिः किमाद्ये खिन्नो भूमिर्" इत्यादिना॥
ग्राह्योक्ति र्गणितोदेशे उपपत्तिमती न चेत् ॥
तदा प्रामाणिकी न स्यादित्यसौ भास्करोऽवदत् ॥ ३२४ ॥
यथा ॥ 'अत्र गणितस्कन्धे उपपत्तिमानेवात्रमः प्रमाणम्' इति॥
ते भास्करादयः खस्या विद्यायाः पौरुषेयतां ॥
खीचक्रु र्ब्रह्मनिःश्वासात् तदुत्पत्तिश्च नोचिरे ॥ ३२५ ॥
नानासूत्रार्थपूर्णानां सिद्धान्तानां विचारणात् ॥
तत्कर्त्तृबाधियां शक्तिः सूक्ष्मता च प्रतीयते ॥ ३२६ ॥
चेत् तादृक्ग्राह्यशक्त्यर्थं प्राग् विदद्दोरकल्पत ॥
तदा कथं न सांख्यादिशक्तयेऽपि क्षमाऽभवत् ॥ ३२७ ॥
सिद्धान्तकल्पने शक्ता चेदासीत् पौरुषी मतिः ॥
तदा कथं न कल्पेत दर्शनादिप्रणीतये ॥ ३२८ ॥
सिद्धान्तवर्त्तिनी विद्या यथा गम्या नृणां धिया ॥
मतानि दर्शनोक्तानि तथा गम्यान्यसंशयं ॥ ३२९ ॥
यदि स्युः पौरुषेयाणि दर्शनानि तदा कुतः ॥
न तादृग्यद्य जायन्ते इति कश्चित् सुधीर्वदेत् ॥ ३३० ॥

Digitized by Google

तत्राहमुत्तरं हृद्यां नवविद्याप्रकल्पने ॥
इदानीं सुधियोऽत्यल्पाः प्रायो बुद्धिं न युञ्जते ॥ ३४९ ॥
यत् प्रत्नाः ग्रन्थकर्त्तारः प्रोचुस्तस्य परीक्षणं ॥
अकृत्वा प्रायशो विज्ञाः स्वीकुर्वन्त्यधुनातनाः ॥ ३५० ॥
पूर्वं नैतादृशं नासीद् महता साहसेन हि ॥
चिरन्तनाः पण्डितास्तत्त्वनिर्णयाय विपेदिरे ॥ ३५१ ॥
वैदान्तिकाग्रणीः कश्चित् परमार्थपरायणः ॥
तत्प्राप्तये तत्त्वबाऊल्यं स्वस्वधीभिरकल्पयन् ॥ ३५२ ॥
अन्ये मूल्योत्तरादीनां ज्ञात्वातत्त्वबुभुत्सया ॥
परीक्षिपूर्वकं ज्योतिरादिविद्यां विनिर्ममुः ॥ ३५३ ॥
यथा च भारते विज्ञा दर्शनादीनि चक्रिरे ॥
तथा सूत्रेषु सर्वेषु भावर्षन्न विदेशिनः ॥ ३५४ ॥
'सर्वज्ञा यवना राजन् शूराश्चैव विशेषतः' ॥
इत्येषा यवनश्लाघा महाभारत उच्यते ॥ ३५५ ॥
ये सन्त्येतर्हि देशेऽस्मिन् मुसल्मानेति विश्रुताः ॥
तेभ्यश्चिरन्तनान् विद्धि यवनान् मदुदाहृतान् ॥ ३५६ ॥
ते पूर्वं यवनाः काव्ये साहित्ये च कलासु च ॥
अतीव प्रेमला भूत्वा विश्रूयन्ते मनीषिणः ॥ ३५७ ॥
विश्वोत्पत्त्यादितत्त्वस्य जिज्ञासन्तो मनीषिणः ॥
नानामतानि तत्रत्यास्तदुद्देशेनाकल्पयन् ॥ ३५८ ॥
ते ग्रन्थान् परमात्मादिविषये यामकुर्वत ॥

Digitized by Google

तन्मध्ये भूरयो लोके प्रचलन्त्यधुनावधि ॥ ४५१ ॥
तद्भ्रान्त्यालोकनात् तेषां विदुषां तत्त्वमार्गगे ॥
मतेरत्यन्तगाम्भीर्यं सूक्ष्मता च प्रतीयते ॥ ४५२ ॥
तन्मध्येऽरिष्टतिल्याख्यो विबुधो लोकविश्रुतः ॥
आन्वीक्षिक्यादिविद्यासु नाना ग्रन्थान् प्रणीतवान् ॥ ४५३ ॥
यः कोपि तत्कृतान् ग्रन्थान् ज्ञानदृष्ट्या विलोकयेत् ॥
अमुं स गौतमादिभ्यो न्यूनं मन्तुं न शक्नुयात् ॥ ४५४ ॥
परन्त्वरिष्टतिल्याद्या यवना विबुधाः समे ॥
स्वां विद्यां स्वीयधीज्ञातां प्रोचुर्न स्वीश्वरोद्भवां ॥ ४५५ ॥
अमीषां सुधियां ज्ञानं पौरुषेयमभूद् यदि ॥
कुतः स्याद् गौतमादीनां ज्ञानस्यापौरुषेयता ॥ ४५६ ॥
इत्यादितर्कजाद् विद्वन् ग्राह्याणां गौतमादिभिः ॥
प्रोक्तानां पौरुषेयत्वं निःसन्देहं निगद्यते ॥ ४५७ ॥
नानादेवार्चना यद्वद् भारते दृश्यतेऽधुना ॥
तथैवामीषु पूर्वेषु प्राचलद् यवनेष्वपि ॥ ४५८ ॥
द्युनामकादिकान् देवान् देवी हेरादिनामिकाः ॥
प्रकल्प्य ते स्वया बुद्ध्या ज्ञानस्थाना सिषेविरे ॥ ४५९ ॥
मते तु नूतने पश्चात् तद्देशे विस्तृते सति ॥
ते सर्वे यवनाः शेषे मिथ्यादेवार्चनां जगुः ॥ ४६० ॥
इदानीं ज्ञापि सुस्थाते यवने तत्र नीहति ॥
तत्रत्यप्रलदेवानां पूजालेशोऽपि नेक्ष्यते ॥ ४६१ ॥

Digitized by Google

विक्रीडांस्तु क्वचित् तत्र शून्यानां देवसद्मनां ॥
भग्नाः स्तम्भादयः स्तब्धा विलोक्यन्ते ऽधुनावधि ॥ ४६२ ॥
ये भारतीयशास्त्राणां ज्ञायते पौरुषेयता ॥
प्रोक्तानां तत्प्रमाणानामुपसंहार उच्यते ॥ ४६३ ॥
कश्चित् परेश्वरोऽस्तीति विदुर्मर्त्याः स्वभावतः ॥
तत्सृष्टिविरुपालोकाद् महिमा चास्य बुध्यते ॥ ४६४ ॥
यदा पिता मनुष्याणामादिमः सङ्गजे नरः ॥
तदा स ईश्वरं सम्यगज्ञासीद् मितधीरपि ॥ ४६५ ॥
यस्मिन् काले तु सोऽभ्यस्तदीश्वराज्ञाविलंघनात् ॥
तत्स्वादीश्वरज्ञानं क्रमात् तस्यान्वयेऽक्षसत् ॥ ४६६ ॥
यत्काले चार्यवंश्यीया लोका भारतमाययुः ॥
तदानीमीश्वरज्ञानं शुद्धं सम्यक् च नाधरन् ॥ ४६७ ॥
अतस्ते वैदिकान् मन्त्रान् कर्तुमारेभिरे यदा ॥
तदाऽग्नीन्द्रादिकान् देवाननर्थांस्तुतुर्भ्रमात् ॥ ४६८ ॥
पश्चाच्च कल्पयित्वाऽन्यान् इन्द्रादिभ्यो विलक्षणान् ॥
नाना ते पूजयामासुर्देवान् देवीभिरन्वितान् ॥ ४६९ ॥
एतेषां चापि देवानां विषये मतविक्रिया ॥
ग्रन्थैः ग्रन्थैः प्रजातेति भाति शास्त्रविचारणात् ॥ ४७० ॥
तद्वैषाम्यान्तरे देवः कतमः परमो भवेत् ॥
इत्यत्र शास्त्रकाराणां मिथो भाति विपर्ययः ॥ ४७१ ॥
वेदान्तादीनि शास्त्राणि यानि तत्त्वबुभुत्सवः ॥

Digitized by Google

मुन्याख्याश्चकुरन्योन्यविरोधस्तेष्वदीक्ष्यते ॥ ४७२ ॥
कल्पे च वेदवेदांगपुराणादिकमग्रहे ॥
मनुष्यबुद्धगम्योऽर्थः कोपि क्वापि न दृश्यते ॥ ४७३ ॥
प्रलानां शास्त्रकाराणां वास्तवं चरितं च यत् ॥
कालात्ययेन तत्सूत्रं लिखेतुच्च न शक्यते ॥ ४७४ ॥
अतस्तत्कृतशास्त्राणां ब्रह्मोक्तत्वस्य सिद्धये ॥
दृढप्रमाणलेशोऽपि नास्तीत्यादिकमब्रुवं ॥ ४७५ ॥
भवान् प्रत्युत्तरं किंचिदपि चेत् तत्र दित्सति ॥
मनोयोगेन तत्सर्वं तर्हि श्रोष्यामि सम्प्रति ॥ ४७६ ॥

वेदविदानुवाच ॥

अनेकांगात्मको वादो भवता कथितोऽस्ति यः ॥
विचारो बज्रलक्तस्य परीक्षार्थमपेक्ष्यते ॥ ४७७ ॥
शास्त्रेष्वापत्तयो वा वाः क्रियन्ते भवता यतः ॥
तन्मध्ये भूयसीः पूर्वं न कदापि न्यगामयं ॥ ४७८ ॥
यो यस्यापततो दोषो भवदादे प्रतीयते ॥
तं तं क्रमेण वक्ष्यामि निदधातु मनो भवान् ॥ ४७९ ॥
आदौ पृच्छामि कस्यापि पुराणस्य सिद्धये ॥
प्रमाणसञ्चयः कीदृगयं युष्मन्मतावितिं ॥ ४८० ॥
श्रुते ब्रह्मोक्ततासिद्धौ नाणं चेदितिचक्रमः ॥
अन्येषां तर्हि दृष्टानां प्राचां स्यान्निर्णयः कथं ॥ ४८१ ॥
उताह प्रलदृष्टानां केषामप्यधुना क्रमैः ॥

Digitized by Google

अत्रको निश्चयो मन्तुमिति किं मन्यते भवान् ॥ ४८२ ॥
ऐतिह्यं प्रलपत्तानां निश्चयार्थमलं तु चेत् ॥
वेदाद्युद्देश्यतैतिह्ये तर्हि को दोष ईक्ष्यते ॥ ४८३ ॥

सत्यार्थ्युवाच ॥

कदापि नाखनैतिह्यं चिरत्नानां श्रुतीषुवा ॥
दृत्तानां निश्चयायेति मया विद्वन् न कथ्यते ॥ ४८४ ॥
यदस्मिन्विषये मह्यं युक्तिसिद्धं प्रतीयते ॥
तत्कृत्वा सर्वमेतर्हि भवान् सम्यक् परीक्षतां ॥ ४८५ ॥
यः पूर्वभूतदृत्तान्तः पारम्पर्येण लभ्यते ॥
स जातु प्रत्ययार्होऽस्ति जातु नास्तीति बुध्यते ॥ ४८६ ॥
दृत्तान्तः कश्चिदेको हि सप्रमाणः प्रतीयते ॥
प्रमाणवर्जितोऽन्यस्तु प्रतिभाति परीक्षणात् ॥ ४८७ ॥
अतोऽमुका पुराद्दृत्तकथा विश्वासमर्हति ॥
न वेत्येतदविवेकाय तद्विशेषो विचार्यतां ॥ ४८८ ॥
असौ कथा कदा कुत्र कस्य वक्त्रादजायत ॥
श्रोतारश्चादिमास्तस्याः कीदृशाः कति चाभवन् ॥ ४८९ ॥
असौ समुद्भवात् पश्चाद् आसु ग्रन्थे समार्प्यत ॥
उतैतिह्येन पूर्वेषां मुखमात्रादवाप्यत ॥ ४९० ॥
इत्यादीनां चरित्रस्य विशेषाणां परीक्षणात् ॥
तत् सत्यमस्तुतासत्यमिति विद्यु र्विवेकिनः ॥ ४९१ ॥
किन्वस्मिन्विषये येन स्फुटः स्यादाशयो मम ॥

Digitized by Google

तदर्थं तं यथाशक्ति विस्तरेण प्रयत्नवे ॥ ४९२ ॥
स्वभावदेशकालादिहेतुभेदसमुद्भवं ।
वैलक्षण्यं मनुष्येषु महदस्तीति बोधयि ॥ ४९३ ॥
केचिज्जना जडा मूर्खा निर्विवेकाः पराश्रयाः ॥
अज्ञाना आप्तविश्वासा यामीया अपि चासते ॥ ४९४ ॥
अन्ये तु साक्षरा दक्षा विद्यावन्तो विचारिणः ॥
स्वतन्त्रबुद्धयोऽनाप्तविश्वासास्तत्त्वचिन्तवः ॥ ४९५ ॥
नानादेशीयलोकाश्च पूर्वमज्ञानविप्लुताः ॥
शेषे विद्योन्नतिं प्रापुरिति लोके प्रसिध्यति ॥ ४९६ ॥
कस्यापि नीकृतो लोका अविज्ञा यावदासते ॥
विचारशक्तिरेतावत् तेषां तिष्ठति निर्बला ॥ ४९७ ॥
अतः सम्भाविनी काऽस्ति प्रमाणैश्चान्विता कथा ॥
का नास्ति चेति तादृक्षै र्लोकैः सम्यङ् न बुध्यते ॥ ४९८ ॥
ते यं यं पूर्ववृत्तान्तं निशाम्यन्ति पुरातनम् ।
स्वकर्णैस्तं पिबन्त्याशु विश्वसन्त्यपरीक्ष्य च ॥ ४९९
कस्यापि नीकृतो लोका यदा विज्ञास्तु जज्ञिरे ॥
तदा विवेचिका शक्तिस्तेषामत्यन्तमेधते ॥ ५०० ॥
अतः का सप्रमाणाऽस्ति निष्प्रमाणा च का कथा ॥
इत्यादिनः परीक्षाये ते कल्पन्ते सुबुद्धयः ॥ ५०१ ॥
किमप्याख्यानमाकर्ण्य प्राक्तनं तादृशा जनाः ॥
तत्राशु न प्रतीयन्ति परीक्षन्ते तु सर्वशः ॥ ५०२ ॥

Digitized by Google

तस्मादाद्यास्त्रिंशतस्य श्रोतारः कीदृशोऽभवन् ॥
इत्येकं तत्त्वसंसत्तौ निश्चेतव्यमवादिषं ॥ ५०३ ॥
अन्यच्च पूर्वदृत्तस्य वक्ता कोऽभवदादिमः ॥
कीदृक्षश्चेति निश्चेतुं योग्यं तत्त्वबुभुत्सुभिः ॥ ५०४ ॥
अत्रासौ सज्ञनो ज्ञानी स्वार्थहीनस्त्रिंशवित् ॥
उत स्वार्थान्वितो वक्तिस्वासीदित्यादि दृश्यतां ॥ ५०५ ॥
केचिद्धि पूर्वदृत्तान्तवक्तारो वक्त्रचेतसः ॥
स्वार्थायावाप्तवी वार्त्ताः कल्पयित्वा प्रपञ्चते ॥ ५०६ ॥
किंस्वामुका कथा कस्मिन् काले कुत्रोदपद्यत ॥
ग्रन्थे कदाऽर्पिता चासीदिति निश्चेतुमर्हति ॥ ५०७ ॥
चेद् ग्रन्थेऽनर्पिता कापि कथा दीर्घान्तरावधि ॥
प्राचां वाक्प्राप्ततोऽश्राव्यि तर्हि शंकोचिता भवेत् ॥ ५०८ ॥
ग्रन्थेष्वनर्पिताः सत्याः पुराहृत्तकथा यतः ॥
विकारं प्रायशः सर्वाः प्राप्नुवन्त्युत्तरोत्तरं ॥ ५०९ ॥
यदुक्तं प्राक्कथाख्यानपरीक्षाविषये मया ॥
दृष्टान्तद्वयरूपेण तद् एतर्हि प्रपञ्चये ॥ ५१० ॥
प्राक्काले पारसीकीयो महाग्रक्षिरधीश्वरः ॥
भीमामश्वोहिणीं नीत्वा देशं यावनमाक्रमीत् ॥ ५११ ॥
तस्मादभिक्रमाद् विद्वन् प्रायशस् त्रिंशताधिके ॥
सहस्रे द्वे तु वर्षाणामद्य यावद् व्यतीयतुः ॥ ५१२ ॥
अल्पेऽपि निर्भयाः सन्तो यवना युत्सु भूरिषु ॥

Digitized by Google

ग्रभोरक्षौहिणीं जित्वा खदेशाद् निरकासयत् ॥ ५२८ ॥
यत्काले ऽभिक्रमं चक्रे पारसीकेश्वरो बली ॥
तदानीं यावने देशे बालः कश्चिदविद्यत ॥ ५२९ ॥
असौ तु यौवनं प्राप्य हेरदत्तभिधो जनः ॥
चरित्रं तस्य युद्धस्य तथ्यमाख्यातुमिच्छवान् ॥ ५३५ ॥
तदानीं तन्महायुद्धसर्ववृत्तान्तसाक्षिवः ॥
पुमांसो भूरयो जीवदवस्थावामवित्तत ॥ ५३६ ॥
अमीषां साक्षिणां वक्त्राद् बुधो निश्चित्य विस्तरं ॥
गद्येन तच्चरित्राब्धि हेरदत्तः प्रणीतवान् ॥ ५३७ ॥
ग्रन्थादौ पारसीकाणा मन्येषाञ्च विदेशिनां ॥
मनुष्याणां पुराहत्तं ग्रन्थकारेण कथ्यते ॥ ५३८ ॥
तत्तद्विदेशिलोकानां पुराहत्तबुभुत्सया ॥
स दूरेष्वपि पर्य्याटीद् विदेशेषु महोद्यमः ॥ ५३९ ॥
बचत्यानां च लोकानां पुराहत्तविदां मुखात् ॥
तत्तद्देशीयहत्तान्तं स चिरं समग्रहीत् ॥ ५४० ॥
यत्काले तत्प्रबन्धस्य रचना तु समाप्यत ॥
तदा क्वचित् स संसत्सु यवनानामपश्यत ॥ ५४१ ॥
सदा सर्वप्रदेशीया यवना यत्र संययुः ॥
क्वाप्यिङ्गीलाख्यवाहारि महती तत्र गीयते ॥ ५४२ ॥
लोकेषु तत्र लीलायां सक्तिर्येषैकदा त्वसौ ॥
हेरदत्तोऽखिलान् सभ्यान् खं प्रबन्धमशुश्रुवत् ॥ ५४३ ॥

Digitized by Google

ततः पश्चाद् अथेनाख्यां भगरीं यावनीं सुधीः ॥
खग्रन्थभावबाधांधी हेरदत्तः समाययौ ॥ ५२४ ॥
सा पूरुषु पूर्वं सर्वासु यावनीषु महायशाः ॥
चातुर्य्यात् कीर्त्तिताश्चासन् जनास्तन्निवासिनः ॥ ५२५ ॥
अथेनावासिनस्वामी वीराङ्गंसनमाख्यिताः ॥
अभूवां खखनेऽप्येऽपि महाशौर्य्येण वेतिरे ॥ ५२६ ॥
तदाऽथेनीवपौरेषु संगृहीतेषु संसदि ॥
तदग्रे खखतं ग्रन्थं ग्रन्थकारोऽपठीत् पुनः ॥ ५२७ ॥
श्रोतृणां भूरयोऽमीषां सैन्या भूत्वा खयं पुरा ॥
खदेशाक्रान्तिवेलायां पारसीकानयुध्यत ॥ ५२८ ॥
ये चान्ये बालका आसन् देशाक्रान्तेरनेहसि ॥
ते खखतातवक्त्रेभ्यखदार्तां शुश्रुवुर्मुहुः ॥ ५२९ ॥
अतः प्रबन्धकारोऽसौ यच्चरित्रं तदाऽपठीत् ॥
तत्सारं पूर्वतः सर्वे तच्छ्रोतारोऽप्यवेदिषुः ॥ ५३० ॥
अथेनावासिनस्वामी श्लोकास्तस्मिन्नेहसि ॥
ग्रामीणा निर्विवेका वा मूर्खा वा नाह्यवित्सत ॥ ५३१ ॥
तन्मध्ये भूरयो दक्षा विद्यावन्तो विचारिणः ॥
खतत्त्वबुद्धयोऽनासुविश्वासाश्चाभवन् बुधाः ॥ ५३२ ॥
साधारणा जनाश्चापि तत्रत्यास्तीक्ष्णबुद्धयः ॥
वार्त्ताजिज्ञासवश्चासन्निति श्लोके प्रसिध्यति ॥ ५३३ ॥
श्लोकानां तादृशां साक्षात् सङ्गतानां सभान्तरे ॥

Digitized by Google

महायुद्धस्य वृत्तान्तं हेरदत्तोऽभवीत् तदा ॥ ५३४ ॥
अतः स तादृशान् विज्ञान् दत्वाँल्लोकानवाब्रवं ॥
वृत्तान्तं श्रावयेदित्थं मम बुद्धौ न सम्भवेत् ॥ ५३५ ॥
अमुष्मिन् यावने देशे प्रदेशा भूरयोऽभवन् ॥
तत्तत्प्रदेशराजत्वं भिन्नं भिन्नमवित्त च ॥ ५३६ ॥
तत्तत्प्रदेशजा लोका राज्यानेकत्वहेतुतः ॥
परस्परेर्ष्यिणोऽ भूवन्नित्याख्यानविदो विदुः ॥ ५३७ ॥
अतस्तत्तत्प्रदेशीया यद्यच्छौर्यमकुर्वत ॥
तल्लेशमप्यपाकर्तुं हेरदत्तस्तु नाशकत् ॥ ५३८ ॥
अत्युक्त्या चेत्तु तन्मध्ये सोऽस्त्राभिष्यत् कानपि ॥
तं नूनं तर्ह्यनिन्दिष्यन् लोका अन्यप्रदेशजाः ॥ ५३९ ॥
अतः सोऽमुष्य युद्धस्य यं प्रबन्धं प्रणीतवान् ॥
स सर्वथाऽस्ति विश्वास्यो विदुषश्च न संशयः ॥ ५४० ॥
असौ प्रोक्तः प्रबन्धस्तु ततोऽमुष्मिन्नने हसि ॥
तदेव प्रचचाखेति सम्यगस्त्यवधारितं ॥ ५४१ ॥
आतत्प्रतीतिवेलातः सन्तत्तं ह्यधुनावधि ॥
तद्ग्रन्थसत्त्वम् आहान्यः ग्रन्थकारपरम्परा ॥ ५४२ ॥
तद्ग्रन्थसत्त्वमेते ये ग्रन्थकारा वदन्ति तु ॥
प्रसिद्धास्ते खयं सन्ति प्राचीनास्च न संशयः ॥ ५४३ ॥
एतस्य विस्तरं विदन् चेत् परीक्षितुमिच्छसि ॥
तर्ह्यस्मिन्विषये ग्रन्थाः सुलभाः सन्ति भूरयः ॥ ५४४ ॥

Digitized by Google

तथा च यः प्रबन्धोऽसौ हेरदत्तसुतो मया ॥
इदानीमुच्यते तस्य निश्चिताऽस्ति चिरन्तना ॥ ५३५ ॥
स यत्र पारसीकीयवृद्धवार्त्तामचीकथत् ॥
अंशोऽसौ तत्प्रबन्धस्य विश्वास्योऽस्तीत्यमन्यवं ॥ ५३६ ॥
ग्रन्थादौ पारसीकादिदेशीयानां महोचितां ॥
चरित्रं कथ्यते प्रत्नमिति पूर्वमवादिषं ॥ ५३७ ॥
विदेशान् पारसीकादीन् हेरदत्तः परिव्रजन् ॥
यत्रात् तत्तत्पुरावृत्तमप्राक्षीदिति चाब्रवं ॥ ५३८ ॥
स यत् खेवं पुरावृत्तं विदेशीयं समग्रहीत् ॥
तत् प्रत्नत्वादिहेतुभ्यः सुविश्वास्यं न बुध्यते ॥ ५३९ ॥
तत्तद्देशीयलोकानां मुखाद् याः प्राक्तनीः कथाः ॥
सोऽशृणोत् ता यथायोग्यं विनिश्चेतुं स नाशकत् ॥ ५५० ॥
यतस्तेषु विदेशेषु चिरकालं स नावसत् ॥
सम्यक् तत्रत्यलोकानां विज्ञेयान् न विवेद च ॥ ५५१ ॥
कथाश्च याः स शुश्राव तत्रत्यानां वृद्धां मुखात् ॥
भूयोऽतिप्रत्नवृत्तान्तविषयिण्यो भवन्ति ताः ॥ ५५२ ॥
अतः स यद् विदेशीयं पुरावृत्तमवर्णयत् ॥
तद् वृत्तानिश्चयात् प्रायः सुविश्वास्यं न विद्यते ॥ ५५३ ॥
तथा च विश्रुतो ग्रन्थो हेरदत्तसुतो बुध ॥
द्विधा विभिद्यते विज्ञैः प्रत्नवृत्तान्तवेदिभिः ॥ ५५४ ॥
खकालिकस्य युद्धस्य यं वृत्तान्तमसौ सुधीः ॥

Digitized by Google

सम्यग्ये वर्णयामास तं विश्वास्यं विदुर्बुधाः ॥ ५५५ ॥
परन्त्वसौ विदेशीयं यच्चरित्रमधीतवत् ॥
तादृक्षं तत्र विश्वासं न कुर्वन्ति मनीषिणः ॥ ५५६ ॥
विदेशपूर्ववृत्तान्तं सदिवक्षुः स सन्नपि ॥
निक्षेतुं नाशकत् सम्यमिति विद्वज्जना विदुः ॥ ५५७ ॥
येनैतं विषयं सम्यक् स्फुटीकुर्यां महाशय ॥
तदर्थमत्र दृष्टान्तमन्यं वक्ष्यामि सम्प्रति ॥ ५५८ ॥
आसीत् भूतार्थनामाऽन्यः प्रसिद्धो बवनः सुधीः ॥
नाना प्रस्तावसम्बन्धिग्रन्थकारो मनोहरः ॥ ५५९ ॥
तत्कालादद्यपर्यन्तं प्रायः सप्तशताधिकं ॥
सहस्रमेकमब्दानां व्यतीयायेति निश्चितं ॥ ५६० ॥
तस्मात् प्राचां स दैश्यानां यवनानाञ्च भूभृतां ॥
सेनान्यां पण्डितानाञ्च चरित्राणि प्रणीतवान् ॥ ५६१ ॥
तेषां महीक्षितादीनां स वृत्तान्तमवर्णयत् ॥
तेषां केचित् सहस्राब्दं तस्मात् पूर्वमबिभ्रत ॥ ५६२ ॥
तन्मध्ये भूरयोऽन्ये तु ग्रन्थकर्तुरनेहसः ॥
अल्पेन व्यवधानेन पूर्वं भूमावजीविषुः ॥ ५६३ ॥
ये राजानोऽचिरात् पूर्वं ग्रन्थकारादबिभ्रत ॥
सम्यक् तदीयवृत्तानि स निक्षेतुमकल्पत ॥ ५६४ ॥
पूर्वे हि सूरयो राज्ञाममीषां समकालिकाः ॥
नाना तदीयवृत्तानि ग्रन्थबद्धान्यकुर्वत ॥ ५६५ ॥

Digitized by Google

येषां त्वसौ कथां राज्ञां सुप्रलापामधीयत ॥
अमीषां तादृशीं वार्तां निर्वक्तुं न प्रभाव सः ॥ ५६६ ॥
अमी हि प्राक्तना भूपा यस्मिन्नासन्नभेदसि ॥
तदा नासीद् बुधः कोपि ग्रन्थकर्तृत्वमेयुषः ॥ ५६७ ॥
पश्चात् कविषु येषु कोऽपि तच्चरित्रमधीतवत् ॥
तच्छ्रुत्यनुभवाऽऽहतं भूरि काव्ये खस्मिन्नवत्सवत् ॥ ५६८ ॥
भूयश्चरित्रवादीनि काव्यान्येतानि च ॥
सदीर्घानेहसं यावत् ग्रन्थवन्ति नाभवन् ॥ ५६९ ॥
तत्प्रलभूभृदाख्यानं स द्यूतार्थी यदाऽग्रहीत् ॥
तदानीं कविताभ्योऽन्यो नासीत् तच्चरितावरः ॥ ५७० ॥
अतो यत् प्रलभूपानां चरितं कवितोद्धृतं ॥
द्यूतार्थी रचयामास तद् विश्वास्यं न मन्यते ॥ ५७१ ॥
तथा च का पुराकल्पकथा विश्वासमर्हति ॥
का नार्हतीति ते विद्वन् यथामत्यहमुक्तवान् ॥ ५७२ ॥
अथो यः पूर्वकल्पाप्तो युष्मच्छास्त्रेषु कथ्यते ॥
स विश्वास्योऽथवा नेति भवान् पश्यतु सज्जति ॥ ५७३ ॥
श्रौताः प्रायोऽखिला मन्त्राः सन्त्यत्यन्तचिरन्तनाः ॥
इत्येतत् पूर्वतो विद्वन् मुदा खीकृतवानहं ॥ ५७४ ॥
मन्त्राणां रचनाकालात् समारभ्याधुनावधि ॥
सहस्रत्रयमब्दानां गतमत्र न संशयः ॥ ५७५ ॥
ये वस्तुतस्तु तन्मध्ये सन्त्यतीव पुरातनाः ॥

Digitized by Google

ते ग्रन्थेभ्यो नवीनेभ्यो भेद्याः सन्ति विवेकिभिः ॥ ५७६ ॥

परन्तु ब्रह्मनिःश्वासादिमान् मन्वानवाप्नुम ॥

इति स्वयं वशिष्ठाद्यास्तत्कर्त्तारो न मेनिरे ॥ ५७७ ॥

अमी च वस्तुतो मन्वा ब्रह्मनिःश्वाससम्भवाः ॥

इत्यस्य साधनं किञ्चिदपि मन्वेषु नेक्ष्यत ॥ ५७८ ॥

यदा तु संहिताऽकारि चिरकालादनन्तरं ॥

तदानीं मन्वकर्त्तॄणां कथा तथा विसस्मरे ॥ ५७९ ॥

मन्वान् यज्ञादिकालेषु निगदन्तः पुरोधसः ॥

तत्कर्मसाधनाश्लोके ग्रन्थः प्राणुर्महादरं ॥ ५८० ॥

तथा पुरोधसः ग्रन्थे वर्णभिन्नत्वमाश्रिताः ॥

सर्वत्र ब्राह्मणाः ख्यातुमारभ्यन्त स्वनीदृति ॥ ५८१ ॥

अतो यत्कारणाद् विप्रास्त्राटक् सम्मानमाप्नुवन् ॥

तच्छ्रौतमन्वमाहात्म्यं लोके बलादचीक्लृपन् ॥ ५८२ ॥

इमे मन्वा हि देवेड्याः सर्वकल्याणहेतवः ॥

ब्रह्मास्याद् मुनिभिःप्रलैराप्यन्तेत्यादि तेऽब्रुवन् ॥ ५८३ ॥

एतादृशेन रूपेण वेदस्यापौरुषेयता ॥

तत्कर्तृणाञ्च दैवत्वं लोके मन्तुं प्रचक्रमे ॥ ५८४ ॥

अनेका मुनिमाहात्म्यवर्द्धयित्र्यः कथास्ततः ॥

विद्वद्भिः कल्पिता भूत्वा ग्रन्थैः प्रख्यातिमाप्नुवन् ॥ ५८५ ॥

अमूः कथास्तु चित्रार्था मुनीनां समकालिकैः ॥

मनुष्यै र्न व्यरच्यन्त पश्चाद्भूतैस्तु शास्त्रिभिः ॥ ५८६ ॥

Digitized by Google

ऋषीणां समकालीना ये जनाः प्रागविद्यत ॥
अमी तान् दैविकान् जन्तुरिति सेतुं न शक्यते ॥ ५८७ ॥
यतस्तदातनो ग्रन्थो मुनिवृत्तान्तवाचकः ॥
एकोऽपि साम्प्रतं विद्वन् वर्त्तमानो न दृश्यते ॥ ५८८ ॥
ऋषीणां येषु माहात्म्यं पुराणेषु तु कीर्त्यते ॥
तेषां नवीनतां पूर्वमहं सम्यगसाधयम् ॥ ५८९ ॥
अतो यास्तत्र कथ्यन्ते महर्षीणां विभूतयः ॥
ता विश्वास्या न मन्यन्तां विद्वद्भिर्बहुभुत्सुभिः ॥ ५९० ॥
या मुनीनां श्रुतेः पश्चात् सहस्राब्दान्तरे गते ॥
कथा तद्विषयेऽकारि सा विश्वास्या कथं भवेत् ॥ ५९१ ॥
ऋषीणां चित्रवृत्तान्तवर्णने च महाशय ॥
मिथः पुराणकर्त्तॄणां सम्मतिर्न विलोक्यते ॥ ५९२ ॥
विश्वामित्रो भरद्वाजो वशिष्ठोऽत्रिः पराशरः ॥
इत्येतेऽन्ये च मन्त्राणां कर्त्तारो मुनयोऽभवन् ॥ ५९३ ॥
तेषामहं तु सर्वेषां कथां वक्तुं न शक्नुयां ॥
परन्त्वेकस्य वृत्तान्तो वशिष्ठस्य प्रवक्ष्यते ॥ ५९४ ॥
आसन् भृग्वादयः पुत्रा ब्रह्मणो मानसा नव ॥
वशिष्ठस्त्वेक तत्रैक इति विष्णुपुराणकृत् ॥ ५९५ ॥
सप्तासन् ब्रह्मणः पुत्रा वशिष्ठस्तत्र सप्तमः ॥
इत्येकस्मिन् स्थले प्रोक्तं महाभारतकारिणा ॥ ५९६ ॥
पुनः स्थलान्तरे विद्वन् महाभारतवर्त्तिनि ॥

Digitized by Google

वशिष्ठे वर्ज्यंते दक्ष एव सप्तम उच्यते ॥ ५९७ ॥

यथा ॥ "ब्रह्मानुसरजे पुत्रान् मानसान् दक्षसप्तमान् ॥

मरीचिमत्र्यङ्गिरसं पुलस्त्यं पुलहं क्रतुम्" इति ॥

ते सप्त ब्रह्मणः पुत्रास्तेऽपि सप्तर्षयोऽभवन् ॥

इत्युक्तितः पुराणस्य वायवीयस्य भासते ॥ ५९८ ॥

यथा वायुपुराणे ॥ "भूयः सप्तर्षयस्त्वेव उत्पन्ना सप्त मानसाः ॥

पुत्रत्वे कल्पितास्त्वेव स्वयमेव स्वयम्भुवः" इति ॥

पुनः पाद्मे पुराणे तु ब्रह्मसप्तसुतान्तरे ॥

वशिष्ठो नोच्यते किन्तु कर्दमस्तत्र गण्यते ॥ ५९९ ॥

मात्स्ये तु ब्रह्मणः पुत्रा दक्ष भार्गवते भव ॥

कौर्मे च द्वादशोच्यन्ते सैंगाद्येषु चतुर्दश ॥ ६०० ॥

मरीचिमन्वराऽन्ये तु ब्रह्मकायात् प्रजज्ञिरे ॥

इत्युच्यते पुराणेषु कथा भागवतादिषु ॥ ६०१ ॥

यथा भागवतस्य ३ स्कन्धे १२ अध्याये उक्तं ॥

"अथाभिध्यायतः सर्गं दश पुत्राः प्रजज्ञिरे ॥

भगवच्छक्तियुक्तस्य लोकसन्तानहेतवः ॥ २१ ॥

मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः ॥

भृगु र्वशिष्ठो दक्षश्च दशमस्तत्र नारदः ॥ २२ ॥

उत्संगान्नारदो जज्ञे दक्षोऽगुष्ठात् स्वयम्भुवः ॥

प्राणाद् वशिष्ठः सञ्जातो भृगुस्त्वचि करात् क्रतुः ॥ २३ ॥

पुलहो नाभितो जज्ञे पुलस्त्यः कर्णयो र्ऋषिः ॥

Digitized by Google

अङ्गिरा मुखतोऽक्ष्णोऽत्रिर्मरीचिर्मनसोऽभवद्" इति ॥ २४
अत्रिस्तु कर्णयो र्जज्ञे मरीचिर्नीचनद्दयात् ॥
इत्थं विलक्षणा वार्त्ता पुराणे लैंग उच्यते ॥ ६०२ ॥
अरुन्धती वशिष्ठस्य वधू र्भागवते स्मृता ॥
पुराणे वैष्णवे तूर्ज्जा तस्य स्त्रीत्वेन कथ्यते ॥ ६०३ ॥
रजोगात्रोर्द्ध्वबाह्वाद्याः सुतयः सप्त सूनवः ॥
वशिष्ठस्याभवन्नित्यं पुराणे वैष्णवे स्मृतं ॥ ६०४ ॥
तस्यैव सूनवो ये तु सन्ति भागवतोदिताः ॥
ते कथ्यन्तेऽपरैः सर्वे चित्रकेत्वादिनामभिः ॥ ६०५ ॥
तादृग् वशिष्ठसम्बन्धिचरित्रेषु परस्परं ॥
नानाविधो विपर्य्यायो पुराणानां प्रतीयते ॥ ६०६ ॥
वशिष्ठनामकः पूर्वमासीद् राजपुरोहितः ॥
कर्त्ता च श्रौतमन्त्राणामिति नाहमपह्नवे ॥ ६०७ ॥
पुरोधसश्च तद्वंश्याः श्रौतमन्त्रप्रणायकाः ॥
प्रसिद्धा भूरयोऽभूवन् पूर्वमत्र न संशयः ॥ ६०८ ॥
पौराणिकैस्तु यत् तस्य ब्रह्मपुत्रत्वमुच्यते ॥
तत् सर्वं मोहसम्भूतं मूलहीनञ्च विद्यते ॥ ६०९ ॥
ये लोका वैदिकं धर्मं भारतेऽस्मिन्नतिष्ठिपन् ॥
ताँल्लोकाः सादरं पश्चाद् ब्रह्मपुत्रांश्चकल्पिरे ॥ ६१० ॥
अमी तु वेधसः पुत्राश्चेदवित्तत वस्तुतः ॥
तदा कुतः पुराणेषु तत्सम्बन्धिविपर्य्ययः ॥ ६११ ॥

Digitized by Google

अतः पुराणकाराय यस्मै यद्यदरोचत ॥
तत्तत् सोऽकल्पयद् मत्या खीमयेति प्रकाश्यते ॥ ६१२ ॥
इत्यादिहेतुभि र्गीतो मुनिसम्बन्धिनीः कथाः ॥
पुराणवर्त्तिनी विद्वन्नविश्वास्या वदाम्यहं ॥ ६१३ ॥
यदेतिह्यं सुविश्वास्यं यच्च नेति स्वयं भवान् ॥
विविच्यामूः पुराणोक्ताः कथाः सम्यक् परीक्षतां ॥ ६१४ ॥

वेदविदनुवाच ॥

यास्कादीयशास्त्रेषु देवबाहुल्यहेतुतः ॥
भवानवोचदापत्तिं शृणु तत्रोत्तरं मम ॥ ६१५ ॥
अनेकै र्नामभि र्देवाः सन्ति सूक्तेषु कीर्त्तिताः ॥
इत्यस्य दर्शनाद् भ्रान्तिं मुनीनामूहते भवान् ॥ ६१६ ॥
परन्तु नामभेदेन ब्रह्म केवलमुच्यते ॥
इत्येतत् प्राज्ञनेनोक्तं वेदानुक्रमलोचता ॥ ६१७ ॥ यथा ॥
"तिस्र एव देवताः इत्यन्तरिक्षस्थाना अग्नि र्वायुः सूर्य इति ॥ एवं व्याहृतयः प्रोक्ता व्यस्ताः समस्तानां प्रजापतिः ॥ ओङ्कारः सर्वदेवत्यः परमेष्ठी ब्राह्मो देवो वा अध्यात्मिकः ॥ तत्तत्स्थाना अन्याश्चाधिभूतयः कर्मप्रत्याख्यादि पञ्चमग्निधानमनुवो भवन्ति ॥ एकैव वा महानात्मा देवता ॥ स सूर्य इत्याचक्षते स हि सर्वभूतात्मा ॥ तदुक्तमृषिणा सूर्य आत्मा जगतस्तस्थुषश्चेति तद्विभूतयोऽन्या देवताः ॥ तदप्येतदृषिणोक्तम् इन्द्रं मित्रं वरुणमग्निमाहुर्" इति ॥

Digitized by Google

सत्यार्थ्युवाच ॥

इन्द्रादीन् सृष्टिकर्त्तारो भिन्नान् देवान् न मेनिरे ॥
विभूती ब्रह्मणश्चित्रं युक्तिसिद्धं न भाति मे ॥ ६१८ ॥
अमी चेत् परमात्मानमद्वितीयमवेदिषुः ॥
विभूतीस्तर्हि सत्यज्य स्वयं तं नाश्रयन् कुतः ॥ ६१९ ॥
ते वह्नीन्द्रादयो देवाः सन्ति ब्रह्मविभूतयः ॥
इत्येतन्मतम् अन्ये तु विज्ञाः पश्चादकल्पयन् ॥ ६२० ॥
यदा हि वैदिकान् मन्त्रान् ब्राह्मणाः पुरोधसः ॥
तदा परात्मनो बुद्धिरत्यन्ता नास्त भारते ॥ ६२१ ॥
पश्चात्तु देवतातत्त्वमन्विच्छन्तो मनीषिणः ॥
एकं ब्रह्मण्यो मन्त्रमारभन्त विचारयन् ॥ ६२२ ॥
यच्छ्रौतोपनिषत्सिद्धे ब्रह्मणः प्रतिपादनं ॥
तदप्यदैतवादित्वाद् विद्वन् मर्म्म न रोचते ॥ ६२३ ॥
अभिन्नं ब्रह्मणो विश्वमिति यत् तत्र मन्यते ॥
तद् युक्तिबाधितं मन्ये मोहजन्यञ्च सर्वथा ॥ ६२४ ॥
पश्चात्तु नौ समाम्नायो यदा वेदान्तमुद्दिशेत् ॥
तदानीं विस्तरादस्य करिष्यावो विचारणं ॥ ६२५ ॥
यत् सूर्य्योद्देशकं वाक्यं श्रुत्यनुक्रमणीकृता ॥
वेदानुद्दिशते तस्य भावं वक्ष्मि यथामति ॥ ६२६ ॥ यथा ॥

ऋग्वेदस्य १ अष्टके १११ सूक्ते १ ऋक् ॥

"चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः आ

Digitized by Google

द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च" इति १॥

अभालोकाकरः सूर्यो रौद्रकारी फलप्रदः ॥

नाकादि खांशुभिर्व्याप्नोदिति मात्रं विवक्षितं ॥ ७२७ ॥

अस्याच्चात्मशब्दो हि रूपकत्वेन कथ्यते ॥

सूर्यस्य जगदात्मत्वम् अर्थतो न विवक्षते ॥ ६२८ ॥

वेदविद्वानुवाच ॥

शैवानां वैष्णवानाञ्च मिथो बुध्या विपर्य्ययं ॥

भवान्ब्रूते पुराणानामप्रमाण्यमपोहते ॥ ६२९ ॥

परन्तु यो भवद्बुद्धौ विपर्य्यायः प्रतीयते ॥

विरोधाभास एवासौ विरोधो वास्तवस्तु न ॥ ६३० ॥

ते वैष्णवा हि शैवाश्च नाममात्रविलक्षणं ॥

सेवन्ते परमात्मानमेकमेव सनातनं ॥ ६३१ ॥

सत्यार्थ्युवाच ॥

शैवानां वैष्णवानाञ्च पक्षलक्षणकारिणां ॥

यः प्राह्तद् विपर्य्यायो मह्यं भाति स वास्तवः ॥ ६३२ ॥

शैवाः शिवं निजैः कैश्चिदवच्छिन्नं विशेषणैः ॥

बोधन्तः परमात्मानम् अद्वितीयमिमं विदुः ॥ ६३३ ॥

विष्णुं गुणैरवच्छिन्नं वैष्णवास्तु विलक्षणैः ॥

विदन्तः परमात्मत्वं केवलस्य हरे र्विदुः ॥ ६३४ ॥

गुणैर्विशिष्टयो र्भिन्नै र्देवयोर्भिन्नयोस्तु ये ॥

आद्यः पृथक् परात्मत्वं तेषां स्यात् सम्मतिः कथं ॥ ६३५ ॥

Digitized by Google

यं शैवाः शास्त्रकर्त्तारो विवादं वैष्णवैः सह ॥
अकार्षुर्बालवः सोऽभूद् न तु शीलात्मको रणः ॥ ६३६ ॥
स्वस्वेष्टदेवमाहात्म्यं कीर्त्तयन्तो हि यत्नतः ॥
अमी परेष्टदेवस्य तत्स्तोतॄंश्चावमेनिरे ॥ ६३७ ॥
स्वयं पुराणकर्त्तारः खं विवादं निरर्थकं ॥
चेन्नाविदुस्तदाऽन्ये तं कुतो विद्युरवालवं ॥ ६३८ ॥
शैवाः पुराणकर्त्तारो वैष्णवास्त्वोभये निजं ॥
शास्त्रं ब्रह्मास्यसम्भूतत्वविप्रोक्तं प्रचक्षते ॥ ६३९ ॥
मतं तु वैष्णवं विदन् ब्रह्मोक्तं यदि विद्यते ॥
तदा मतस्य शैवस्य ज्ञायते पौरुषेयता ॥ ६४० ॥
शैवं तु चेन्मतं तथ्यं ब्रह्मप्रोक्तञ्च मन्यते ॥
निःशङ्कं वैष्णवः पश्चात् पौरुषेयस्तदा भवेत् ॥ ६४१ ॥
परन्तु वस्तुतो विद्वन्निमे पौराणिके मते ॥
उभे विमोहसञ्जाते आसाते नात्र संशयः ॥ ६४२ ॥

वेदविज्ञानुवाच ॥

स्वदेशीयानि शास्त्राणि प्रोदितानि महर्षिभिः ॥
आबाल्यादद्यपर्य्यन्तं भवताऽऽदृतवानहं ॥ ६४३ ॥
तत्र प्रत्नैर्बुधैः शुद्धं धर्मवर्त्म प्रदिश्यते ॥
सम्यक् च तात्त्विकस्तत्र मुक्त्युपायो निरूप्यते ॥ ६४४ ॥
शास्त्राणां तादृशां श्रुत्वा खण्डनं भवता कृतं ॥
अहं कथं न खिद्येय स्वेष्टशास्त्रावहेलनात् ॥ ६४५ ॥

Digitized by Google

येषां ज्ञानप्रदैर्वाक्यैः प्रश्नितोऽस्म्यधुनावधि ॥
कथं मन्येय शास्त्राणां तादृशां पौरुषेयतां ॥ ६४६ ॥
तथापि तत्त्वजिज्ञासुं भवन्तं न तु मत्सरं ॥
विज्ञाय श्रेयवादस्य श्रोतुमिच्छामि विस्तरं ॥ ६४७ ॥

सत्यार्थुवाच ॥

खदेशोत्पन्नशास्त्राणां श्रुतं श्रुत्वा परीक्षणं ॥
भवान् खिन्नात्मकोऽस्तीति चमत्कारि न विद्यते ॥ ६४८ ॥
चिराय प्रीयते येषु विषयेषु श्रद्धां मनः ॥
ते तेषां दूषणं नापु स्वीकुर्वन्ति परैः कृतं ॥ ६४९ ॥
विश्रेयतो निजे धर्मे पैतृके त्वनुषङ्गिणः ॥
नराः प्रायः समे तस्य श्रोतुं नेच्छन्ति खण्डनं ॥ ६५० ॥
एतत्तु पूर्वतो जानन्नावादारम्भणाद् अहं ॥
यथाशक्त्यप्रिया वाचः सर्वास्त्यक्तुमचेष्टिषि ॥ ६५१ ॥
यावान् मयाऽधिको वादो वक्ष्यमाणोऽवधिष्यते ॥
तत्रापि भारतीं श्लक्ष्णां प्रयोक्ष्येऽहं महाशय ॥ ६५२ ॥
अथो वेदादिशास्त्रोक्तनानाऽर्थानां विचारणात् ॥
सर्वाणि तानि शास्त्राणि परीक्षिष्य यथामति ॥ ६५३ ॥
आदौ वादोपयोगित्वात् परमेश्वरवर्णनं ॥
मया यदत्र कर्त्तव्यं भवता तद् निशम्यतां ॥ ६५४ ॥
अस्त्येक ईश्वरोऽनादिरप्रमेयः सनातनः ॥
निराकारः पवित्रात्मा सर्ववेदी दयामयः ॥ ६५५ ॥

Digitized by Google

स एव विश्वमस्राक्षीदिदं चित्रं चराचरं ॥
सदा च पालयन्नस्मि प्रजाः शास्मि च धर्मतः ॥ ६५६ ॥
प्रजानां खेन रूपेण क्रियाः सर्वा विलोकयन् ॥
स लोकशासिता विद्वन्नुदासीनो न तिष्ठति ॥ ६५७ ॥
स रागद्वेषहीनोऽपि सत्सु कर्मसु सत्सु च ॥
सत्स्वसत्सु च मर्त्येषु समदर्शी न विद्यते ॥ ६५८ ॥
स धर्माधर्मयोः साम्यममन्वानश्च कर्मणां ॥
फलानि न्यायतो दत्ते पक्षपातेन वर्ज्जितः ॥ ६५९ ॥
यावन्तः सुकृतो लोकाः स तावत्सु प्रसीदति ॥
सर्वेषु त्वप्रसन्नोऽस्ति दृष्टु दुष्कर्मकर्तृषु ॥ ६६० ॥
दृष्टां कर्म्माणि सर्वाणि स्वयमेव विचारयन् ॥
स तत्फलानि सर्वेभ्य इहामुत्र च यच्छति ॥ ६६१ ॥
इदानीमीश्वरो दुष्टान् सहमानोऽपि मानवान् ॥
परत्र दण्डनं तेषां यथायोग्यं करिष्यति ॥ ६६२ ॥
तादृक्सदुक्तयाद्यः सन्नीश्वरो नीतये दृशां ॥
कीदृक्तं चोदयेच्छास्त्रमिति पश्येत् स्वयं भवान् ॥ ६६३ ॥
मदीयस्त्वाशयो विद्वन् येन सम्यक् स्फुटो भवेत् ॥
तदर्थमत्र दृष्टान्तमेकं वक्ष्यामि लौकिकं ॥ ६६४ ॥
प्राक् कश्चित् सत्यसिंहाख्यो भूस्वामी मगधेऽवसत् ॥
दयालु र्धार्मिको विद्वान् सत्यसन्धः प्रजाहितः ॥ ६६५ ॥
स ज्येष्ठं रूपसिंहाख्यं स्वीयमात्मजमोकसि ॥

Digitized by Google

विद्यां शिक्षा स्वयं पश्चात् कार्य्ये शिक्षार्थमैरयत् ॥ ६६६ ॥
माऽभूत् कुसङ्गयोगेन दुराचारस्तु मे सुतः ॥
इत्येतदुत्सुकस्तातो बऽधा तमुपादिशत् ॥ ६६७ ॥
तथा स प्रस्थितो गेहाद् आगतश्च वराब्जसौ ॥
बुधस्य कस्यचित् पार्श्वे विद्याप्राप्तावधेऽभवत् ॥ ६६८ ॥
धनादिसम्पदं दृष्ट्वा सत्यसिंहस्य दुर्जनाः ॥
केचित् तदीर्ष्यया पूर्णास्तस्मिन्क्षोभिषवोऽभवन् ॥ ६६९ ॥
स पुत्रे प्रीयते खलिमिति ज्ञात्वा तु ते शठाः ॥
तत्सूनो र्दूषणायेममुपायं समकल्पयन् ॥ ६७० ॥
ते मुद्रां सत्यसिंहस्य मुद्रया सदृशीं परां ॥
निर्माय कृत्रिमां पत्रीमनुदंशस्य सूनवे ॥ ६७१ ॥
तत्राहितोपदेशेन भूरिशो मोहकारिणा ॥
मनस्ते रूपसिंहस्य व्यसनाबोदतेजयन् ॥ ६७२ ॥
कामादिनिग्रहो वत्स न कर्त्तव्योऽस्ति यौवने ॥
इत्यादिः कुत्सितो मन्त्रस्तस्यां पत्र्यामलिख्यत ॥ ६७३ ॥
विद्यायाः शिक्षणे तस्मिंस्तस्मे व्याप्ते सति ॥
असौ तत्पार्श्वमानिन्ये लिपिर्दूतेन केनचित् ॥ ६७४ ॥
आदौ दूतस्य वक्त्रेण वचसा वञ्चितो युवा ॥
स्वपित्रा लिखितां बुद्ध्वा तां पत्रीं मुदितोऽग्रहीत् ॥ ६७५ ॥
यदा त्वर्थं तदन्तःस्थं मनोयोगेन सोऽपठीत् ॥
तदानीमासु सन्देहस्तस्य चेतस्यजायत ॥ ६७६ ॥

Digitized by Google

साधु जितेन्द्रियो धीमान् वत्सलो जनको मम ॥
मदीयं सर्वथा सम्यक् परमं हितमिच्छति ॥ ६७७ ॥
सदा वेश्यादिसंसर्गाद् दूरे तिष्ठ मम प्रिय ॥
वत्सेति प्रस्थितेः काले स भूयो मामुपादिशत् ॥ ६७८ ॥
तादृक् सन् मे पिता साधुरेतल्लिप्यन्तरे स्थितां ॥
सुमन्त्रणां मदाचारदूषणाय लिखेत् कथं ॥ ६७९ ॥
कदापि कुत्सितां पत्नीमिमां मे नालिखत् पिता ॥
मद्वेष्टाऽन्यस्तु कोऽपीति सुष्ठु जानामि सम्प्रति ॥ ६८० ॥
इत्युक्ताऽसौ युवा दूतमपृच्छत् पत्रवाहकं ॥
मां ब्रूहि त्वं करात् कस्य पत्रिकां प्राप्तवानिति ॥ ६८१ ॥
एतन्निशम्य दूतस्तु वञ्चकः प्रत्यभाषत ॥
अहं तां त्वत्पितुर्हस्तात् तद्गृहे खल्वगामिति ॥ ६८२ ॥
पुनस्तु तन्मुखं दृष्ट्वा रूपसिंहस्तथाऽस्मरत् ॥
मत्तातवैरिदासोऽयं प्रागहं दृष्टवानिति ॥ ६८३ ॥
एतत् स्मरन् युवा पत्रीं खपितुर्हस्तलिपिं ॥
न तु स्वेनेरितां पित्रा निःसन्देहमबुध्यत ॥ ६८४ ॥
पश्चादल्पेषु वर्षेषु व्यतीतेष्वपरां लिपिं ॥
स्वतातकिङ्करागीतां वाचयां प्राप्तवानसौ ॥ ६८५ ॥
स्वतातकिङ्करं साधुं सरलं सत्यवादिनं ॥
ज्ञात्वा युवा तु तद्वाक्ये व्यश्वसीत् संशयोज्झितः ॥ ६८६ ॥
ततो लिपिं तदानीतां पठित्वा स सुमन्त्रणां ॥

Digitized by Google

सदन्तर्लिखितां प्राप्नोत् समीचीनां हितावहां ॥ ६८७ ॥
नुन्ना पिष्टा मदीयेन पत्रिकेयमसंशयं ॥
इति द्राभ्यां प्रमाणाभ्यां तत्रणोऽसावबुध्यत ॥ ६८८ ॥
स पत्रवाहकं दूतं सत्यं सत्यवादिनं ॥
साधुं विश्वास्यमज्ञासीदित्येकं निश्चयास्पदं ॥ ६८९ ॥
लिपेरर्थं खतातस्य सत्यभावानुसारिणं ॥
न तद्विरुद्धमापेति द्वितीयं निश्चयास्पदं ॥ ६९० ॥
अथो वेदादिशास्त्राम्नायानां परीक्षणे ॥
दृष्टान्तोऽयं मया विद्वन् यथावहि प्रयोक्ष्यते ॥ ६९१ ॥
दृष्टान्तप्रोक्तयो र्द्वियोः सत्यतायाः परीक्षणे ॥
युक्तो दूतस्य पत्रस्य कीदृशत्वं यथातथं ॥ ६९२ ॥
तथैव सर्वशास्त्राणां प्रामाण्यस्य परीक्षणे ॥
शास्त्रस्य तत्प्रवक्तुश्च कीदृशत्वं विचार्यतां ॥ ६९३ ॥
आद्याः के कीदृशाश्चासंस्तच्छास्त्रप्रवर्त्तकाः ॥
ते सत्यवादिनः सर्वे सरलाश्चोत नाभवन् ॥ ६९४ ॥
शास्त्रप्रवर्त्तनार्थाय परेशेनेरिता वयं ॥
इत्येतत् ते स्वयं प्रोचुरुत नैवमवादिषुः ॥ ६९५ ॥
वेदात्मनः परेशेन प्रेषितांशेऽवदंस्तदा ॥
प्रमाणं तत्र ते दातुमशक्नुवन्न शक्नुवन् ॥ ६९६ ॥
मनुष्यमात्रसामर्थ्यादधिका शक्तिरद्भुता ॥
अमीषु कापि निष्ठाऽऽसीद् उत कापि न निष्ठिता ॥ ६९७ ॥

Digitized by Google

इत्यादि आप्तवक्तृणां समक्षानां परीक्षणं ॥
विद्वद्भिरस्ति कर्त्तव्यं सर्वैस्तत्त्वबुभुत्सुभिः ॥ पञ्चभिः कुलकं ॥ ६९८
पूर्वं त्वक्षं समक्षाणां वशिष्ठादिपुरोधसां ॥
अनाप्तत्वाप्तवक्तृणां तत्वं सर्वं व्यचारयं ॥ ६९९ ॥
अमीषां वास्तवी वार्त्ता पुराणादिषु नोच्यते ॥
अत्युक्तिदूषिता नित्यमतिमूर्खमवादिवं ॥ ७०० ॥
शास्त्रप्रवर्त्तनार्थाय परमेशेन चोदितान् ॥
दूतांस्तु आत्मनः प्रोचुरिति नैव प्रतीयते ॥ ७०१ ॥
मनुष्यमात्रसामर्थ्यादधिका शक्तिरद्भुता ॥
तेष्वासीदिति केनापि प्रमाणेन न सिध्यति ॥ ७०२ ॥
परञ्च तच्चरित्राणां चित्रार्थानां विलोकनात् ॥
तदन्तर्वर्त्तिदृष्टान्तानामसत्यत्वं प्रतीयते ॥ ७०३ ॥
इत्यादिकेन वादेन पूर्वोक्तेन यथामति ॥
अनाप्तत्वाप्तवक्तृणामप्रामाण्यमसाधयं ॥ ७०४ ॥
अथो लिप्योक्तयोरर्थं दृष्टान्तोक्तौ युवा यथा ॥
पर्यालिप्य तथा कार्य्यं शास्त्रोक्तार्थपरीक्षणं ॥ ७०५ ॥
सा कुत्सितार्थिका यत्नैः मत्पित्रा शुद्धचेतसा ॥
नुन्ना न सम्भवेदित्थं युवा न्याय्यमतर्कयत् ॥ ७०६ ॥
शास्त्राप्तामीश्वरोक्तत्वं सम्भवत्युत नेति तु ॥
तत्रोक्तमर्थमालोच्य कस्यिद्वो विचारणं ॥ ७०७ ॥
प्रजानां चित्तमर्मज्ञो धर्मात्मा परमेश्वरः ॥

Digitized by Google

शुद्धाचाराऽन्वितां नत्वां चित्तशुद्धिमभीच्छति ॥ ७०८ ॥
मामेकमन्तरा तथ्यं विश्वकर्तारमीश्वरं ॥
कोऽप्यन्यो नार्चतां देव इति चादिग्रतीश्वरः ॥ ७०९ ॥
अथोऽर्थोऽत्यशास्त्रोक्तश्चित्तशुद्धिप्रवर्द्धकः ॥
तथेश्वरार्चनादेशो चोत नेति विलोक्यतां ॥ ७१० ॥
भूयोऽत्येषु शास्त्रेषु वेदाद्येषु दिवौकसां ॥
भूरीणा मर्चना मर्च्यः करणीया प्रदिश्यते ॥ ७११ ॥
ऋगादिवेदसूक्तेषु वह्नि र्वायुः शचीपतिः ॥
अनर्च्याश्चापरे देवाः समर्च्यन्ते मुऊ मुंऊः ॥ ७१२ ॥
ऋग्वेकस्यां मया पूर्वमुद्धृतायां दिवौकसः ॥
महत्त्वाद्येन भेदेन प्रशस्यन्ते चतुर्विधाः ॥ ७१३ ॥ यथा ॥
"नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः
यजाम देवान् यदि शक्नवाम मा ज्यायसः
शंसमा वृक्षि देवाः" इति ऋग्वेदे १ अष्टके १७ सूक्ते १३ ऋक्
अनर्च्यानान्तु देवानामर्चनायाः प्रचोदनात् ॥
सूक्तानां संहिता मध्यमीश्वरोक्ता न भासते ॥ ७१४ ॥
श्रौतीषूपनिषत्सूक्तं यत्तु वैदान्तिकं मतं ॥
अग्रेऽस्याहं करिष्यामि यथाबुद्धि विचारणं ॥ ७१५ ॥
आदौ तु यत् पुराणेषु ब्रह्मविष्ण्वादिवर्णनं ॥
क्वचिद् विलोक्यते तस्य करणीयं विचारणं ॥ ७१६ ॥
स्त्रीयां कन्यां प्रति ब्रह्मा निन्द्यं कर्माचचार यत् ॥

Digitized by Google

गृह्णातु विस्तरं तस्य भवान् भागवतोदितं ॥ ७१७ ॥ ब्रह्मा
"वाचं दुहितरं तन्वीं स्वयम्भूर्हरतीं मनः ॥
अकामां चकमे क्षत्तः सकाम इति नः श्रुतं ॥ २८ ॥
तमधर्मे कृतमतिं विलोक्य पितरं सुताः ॥
मरीचिमुख्या मुनयो विश्रम्भात् प्रत्यबोधयन् ॥ २९ ॥
नैतत् पूर्वैः कृतं त्वद्ये न करिष्यन्ति चापरे ॥
यस्त्वं दुहितरं गच्छेरनिगृह्याङ्गजं प्रभुः ॥ ३० ॥
तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ॥
यद्वृत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पते । ३१ ॥
तस्मै नमो भगवते य इदं स्वेन रोचिषा ॥
आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति ॥ ३२ ॥
स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजापतीन् ॥
प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा" ॥ ३३ ॥

इति भागवतस्य ३ स्कन्धे १२ अध्याये ॥

यः कर्म तादृगाचारोद् अपविद्धं प्रजापतिः ॥
स मुह्यमानसैं मंत्रैः पूरुगीवः कथं भवेत् ॥ ७१८ ॥
तन्निष्कर्मदृद् ब्रह्मा परमात्मा न विद्यते ॥
अतः स कामग्रिग्नोऽभूदिति कश्चिद् बुधो वदेत् ॥ ७१९ ॥
तथाहमुत्तरं दद्यां तस्मिन् भागवते स्वयं ॥
परात्मा यो मतः कृष्णः सोऽपि कामातुरः स्मृतः ॥ ७२० ॥
पूर्वः परेश्वरो यस्मिन्नवतीर्णः प्रकल्प्यते ॥

Digitized by Google

स ब्रह्मोऽप्यसदाचाराद् निन्द्योऽभूदिति सिध्यति ॥ ३२१ ॥
यस्मादृशानि कर्माणि निन्दार्हाणि समाचरत् ॥
कदापि तस्य ब्रह्मत्वं पारमात्म्यं न सम्भवेत् ॥ ३२२ ॥
यस्मिंस्तादृंशि कर्माणि तारोप्यन्ते परात्मनि ॥
तच्छास्त्रस्येश्वरोक्तत्वं सद्भिः मंक्तुं न शक्यते ॥ ३२३ ॥
यस्मिंश्च तादृशां पूजा देवतानां प्रदिश्यते ॥
कदापि तादृशं शास्त्रमीश्वरो नह्युपोदयत् ॥ ३२४ ॥
मत्सिना शुद्धचित्तेन न मन्नेयमसंशयः ॥
इत्थं दृष्टान्तनिर्दिष्टो युवा न्याय्यमतर्कयत् ॥ ३२५ ॥
तथा येऽप्यीश्वरानर्हाः शास्त्रेष्वर्थो विलोक्यते ॥
न तानीशेरितानीति तर्कणीयं मनीषिभिः ॥ ३२६ ॥

वेदविदानुवाच ॥

याऽऽपत्तिः ब्रह्मामुद्दिश्य भवता क्रियतेऽधुना ॥
पुरा तस्याः परीहारं शुको भागवतेऽकरोत् ॥ ३२७ ॥

यथा भागवते २० स्कन्धे ३३ अध्याये

राजोवाच ॥

"संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥
अवतीर्णो हि भगवानंशेनजगदीश्वरः ॥
स कथं धर्मसेतूनां वक्ता कर्ताऽभिरक्षिता ॥
प्रतीयमाचरद् ब्रह्मन् परदारोभिमर्शनं ॥
आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितं ॥

Digitized by Google

किमभिप्राय एतन्नः संशयं छिन्धि सुव्रत ॥

शुक उवाच ॥

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं ॥
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥
नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः ॥
विनश्यत्याचरन् मौढ्याद् यथाऽरुद्रोऽब्धिजं विषं ॥
ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥
तेषां यत् स्ववचो युक्तं बुद्धिमांस्तत् समाचरेत् ॥
कुशलाचरितैस्तेषामिह स्वार्थो न विद्यते ॥
विपर्ययेण चानर्थो निरहंकारिणां प्रभो ॥
किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसां ॥
ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः" इति ॥

सत्यार्थ्युवाच ॥

राज्ञः शंकां शुको येन परिहर्तुमचेष्टत ॥
सा शंका तेन तर्केण परिहर्तुं न शक्यते ॥ ७२८ ॥
गीतायां यद् वचः कृष्णो ब्रुवाणः स्वयमुच्यते ॥
तेनैव भवति स्पष्टा शुकवाक्यनिरास्कृतिः ॥ ७२९ ॥
तथाच गीतायां तृतीयाध्याये विंशतितमाद्याः श्लोकाः ॥
"कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥

Digitized by Google

स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ।
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि ।
यद्यहं हि न वर्त्तेय जातु कर्मण्यतंद्रितः ।
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ।
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ।
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ।
सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत ।
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्" इति ।
ब्रह्मोद्देशे खचे पूर्वमुक्ते भागवतोदृते ।
तदेवाऽऽ मरीचाद्यास्तत्पर्यवस्यन्तः प्रजापतिं ॥ ७३० ॥ यथा ॥
"तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ।
यदुत्तमश्लोकतमं वैलोक्यः क्षेमाय कल्पते ॥ ११ ॥
तस्मै नमो भगवते य इदं स्वन रोचिषा ।
आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति" इति भागवतं ॥
अनावधीयतां विद्वन् तेजीयान् सन्नपि स्वयं ॥
अतस्तेऽतात्मजे ब्रह्मा मरीचाद्यैर्विजैरिति ॥ ७३१ ॥
तेजीयानपि चेद् ब्रह्मा निन्द्योऽभूत् कामचारतः ॥
तेजीयस्त्वात् सदा ज्ञानी धर्मत्राणे प्रभुः कथं ॥ ७३२ ॥
अतः कर्त्ता रघुवंशस्य कालिदासोऽवदत् कविः ॥
तदस्मिन् विषये वाक्यं प्रयोक्तव्यं विचारिभिः ॥ ७३३ ॥

Digitized by Google

यथा रघुवंशे १ सर्गे ७१ श्लोकादिं ।

'पथः श्रुचे दर्शयितार ईश्वरा
मनीमसाम् आददते न पद्धतिम्' इति ॥

वेदविदानुवाच ॥

किमर्हतीश्वरः कर्तुं किं नार्हतीत्यप्रमेयधीः ।
इत्येतत् केन जानीयु र्मनुष्याः स्वल्पबुद्धयः ॥ ७२४ ॥

सत्यार्थुवाच ॥

अगाधबुद्धिगाम्भीर्यः सर्वज्ञश्चेश्वरो नरैः ॥
सम्यङ् न शक्यते ज्ञातुमिति खीक्रियते मया ॥ ७२५ ॥
यान् राजकर्मसूपायान् राजामात्याः प्रयुञ्जते ॥
न मूर्खै राजनीत्यज्ञै र्बुध्यते तत्प्रयोजनं ॥ ७२६ ॥
तथा प्रयोजनं येषां नरै र्बोद्धुं न शक्यते ॥
उपायांस्तादृशान् भूरीन् प्रयुंक्ते परमेश्वरः ॥ ७२७ ॥
नरेभ्यो महतीरन्याः प्रजा बुद्धिमतीः पुरा ॥
सृजतिस्मैव सोऽद्याद्यीदधुनावधि शास्ति च ॥ ७२८ ॥
आवर्षकोटिविस्तीर्णो राजनीतिक्रमो विभोः ॥
त्रैलोक्यवर्त्तिनीः सर्वाः प्रजाः सम्यङ् नियच्छति ॥ ७२९ ॥
महान्तं तादृशं दिव्यं राजनीतिक्रमं कथं ॥
अल्पायुषां तनुः सम्यगवगच्छेत् कथां मतिः ॥ ७३० ॥
यदर्थसिद्धये मर्त्याः प्रयतन्तेऽचिरायुषः ॥
तमाशु प्राप्तुमिच्छन्तो न सहन्ते विलम्बनं ॥ ७३१ ॥

Digitized by Google

स क्षत्त्रोऽप्यसदाचारान् निन्द्योऽभूदिति सिध्यति ॥ ७२१ ॥
यस्मात्तत्राणि कर्माणि निन्दार्हाणि समाचरत् ॥
कदापि तस्य क्षत्त्रस्य पारमात्म्यं न सम्भवेत् ॥ ७२२ ॥
यस्मिंस्तादृशि कर्माणि त्वारोप्यन्ते परात्मनि ॥
तच्छास्त्रस्येश्वरोक्तत्वं सद्भिर्मन्तुं न शक्यते ॥ ७२३ ॥
यस्मिंश्च तादृशां पूजा देवतानां प्रदिश्यते ॥
कदापि तादृशं शास्त्रमीश्वरो नह्यचोदयत् ॥ ७२४ ॥
मत्वेत्या शुद्धचित्तेन न मुन्नेयमसन्निधिः ॥
इत्थं दृष्टान्तनिर्दिष्टो युवा न्याय्यमतर्कयत् ॥ ७२५ ॥
तथा येऽप्यीश्वरानर्हाः शास्त्रेष्वर्थो विलोक्यते ॥
न तानीशेरितानीति तर्कणीयं मनीषिभिः ॥ ७२६ ॥

वेदविद्वानुवाच ॥

याऽऽपत्तिः क्षत्त्रमुद्दिश्य भवता क्रियतेऽधुना ॥
पुरा तस्याः परीहारं शुको भागवतेऽकरोत् ॥ ७२७ ॥

यथा भागवते १० स्कन्धे ३३ अध्याये

राजोवाच ॥

"संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥
अवतीर्णो हि भगवानंशेनजगदीश्वरः ॥
स कथं धर्मसेतूनां वक्ता कर्ताऽभिरक्षिता ॥
प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनं ॥
आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितं ॥

Digitized by Google

किमभिप्राय एतन्नः संशयं छिन्धि सुव्रत ॥

शुक उवाच ॥

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसं ॥
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥
नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः ॥
विनश्यत्याचरन् मौढ्याद् यथाऽरुद्रोऽब्धिजं विषं ॥
ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥
तेषां यत् स्ववचो युक्तं बुद्धिमांस्तत् समाचरेत् ॥
कुशलाचरितैस्तेषामिह वार्थो न विद्यते ॥
विपर्ययेण चानर्थो निरहंकारिणां प्रभो ॥
किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसां ॥
ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः" इति ॥

सत्यार्थ्युवाच ॥

राज्ञः श्रद्धां शुको येन परिहर्तुमचेष्टत ॥
सा श्रद्धा तेन तस्यैव परिहर्तुं न शक्यते ॥ ७२८ ॥
गीतायां यद् वचः कृष्णो ब्रुवाणः स्वयमुच्यते ॥
तेनैव भवति स्पष्टा शुकवाक्यनिराकृतिः ॥ ७२९ ॥
तथाच गीतायां तृतीयाध्याये विश्वसितमादरः श्लोकाः ॥
"कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ॥

Digitized by Google

स यत् प्रमाणं कुरुते लोकस्तदनुवर्त्तते ॥
न मे पार्थास्ति कर्त्तव्यं त्रिषु लोकेषु किंचन ॥
नानवाप्तमवाप्तव्यं वर्त्त एव च कर्मणि ॥
यद्यहं हि न वर्त्तेय जातु कर्मण्यतंद्रितः ॥
मम वर्त्मानुवर्त्तन्ते मनुष्याः पार्थ सर्वशः ॥
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ॥
सङ्करस्य च कर्त्ता स्यामुपहन्यामिमाः प्रजाः ॥
सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत ॥
कुर्याद्विद्वांस्तथाऽसक्तश्चिकीर्षुर्लोकसंग्रहम्" इति ॥
ब्रह्मोद्येऽपि स्वयं पूर्वमुक्ते भागवतोदृते ॥
तदेवाऽऽह मरीच्याद्यास्तर्ज्जयन्तः प्रजापतिं ॥ ७१० ॥ यथा ॥
"तेजीयसामपि ह्येतन्न सुश्लोक्यं जगद्गुरो ॥
यदृत्तमनुतिष्ठन् वै लोकः क्षेमाय कल्पते ॥ ११ ॥
तस्मै नमो भगवते य इदं स्वन रोचिषा ॥
आत्मस्थं व्यञ्जयामास स धर्मं पातुमर्हति" इति भागवतं ॥
अत्रावधीयतां विद्वन् तेजीयान् सन्नपि स्वयं ॥
अतर्ज्यंतात्मजै ब्रह्मा मरीच्याद्यैर्निजैरिति ॥ ७११ ॥
तेजीयानपि चेद् ब्रह्मा निन्द्योऽभूत् काममाचरन् ॥
तेजोवत्त्वात् तदा क्षत्रो धर्मत्यागे प्रभुः कथं ॥ ७१२ ॥
यत् कर्त्ता रघुवंशस्य कालिदासोऽब्रवीत् कविः ॥
तदस्मिन् विषये वाक्यं प्रयोक्तव्यं विचारिभिः ॥ ७१३ ॥

Digitized by Google

यथा रघुवंशे १ सर्गे ७२ श्लोकार्द्धं ॥

'पद्यः सुचे दर्शयितार ईश्वरा
मचीमसाम् आददते न पद्धतिम्' इति ॥

वेदविदानुवाच ॥

किमर्हतीश्वरः कर्तुं किं नार्हत्यप्रमेयधीः ॥
इत्येतत् केन जानीयु र्मनुष्याः खल्पबुद्धयः ॥ ७२३ ॥

सत्यार्थ्युवाच ॥

अगाधबुद्धिगाम्भीर्यः सर्वज्ञश्चेश्वरो नरैः ॥
सम्यङ् न ज्ञायते ज्ञातुमिति खीक्रियते मया ॥ ७२५ ॥
यान् राजकर्मसूपायान् राजामात्याः प्रयुञ्जते ॥
न मूर्खै राजनीत्यज्ञै र्बुध्यते तत्प्रयोजनं ॥ ७२६ ॥
तथा प्रयोजनं येषां नरै र्बोद्धुं न शक्यते ॥
उपायांस्तादृशान् भूरीन् प्रयुंक्ते परमेश्वरः ॥ ७२७ ॥
नरेभ्यो महतीरन्याः प्रजा बुद्धिमतीः पुरा ॥
सृजतिस्मैव सोऽद्याप्तीदधुनावधि शास्ति च ॥ ७२८ ॥
आवर्षकोटिविख्यातौ राजनीतिक्रमौ विभोः ॥
त्रैलोक्यवर्त्तिनीः सर्वाः प्रजाः सम्यङ् नियच्छति ॥ ७२९ ॥
महान्तं तादृशं दिव्यं राजनीतिक्रमं कथं ॥
अल्पायुषां तनुः सम्यगवगच्छेत् तृणां मतिः ॥ ७३० ॥
यदर्थसिद्धये मर्त्याः प्रयतन्तेऽचिरायुषः ॥
तमात्मु ज्ञातुमिच्छन्तो न सहन्ते विलम्बनं ॥ ७३१ ॥

Digitized by Google

यान् प्राप्नुतः परेभ्यस्तु महतोऽर्थान् समीहते ।
तान् प्रायशो विलम्बेन परिणामं नयत्यसौ ॥ ७४२ ॥
एको घण्टो हि तद्वृद्धौ सहस्राब्दसमो बुध ।
तथा सहस्रमब्दानामेकघण्टसमं मतं ॥ ७४३ ॥
मनुष्यो भूतले निष्ठः सर्वेषां पार्श्ववर्त्तिनां ।
वस्तूनां रूपवर्णादि सम्यक् ग्रहीति वीक्षितुं ॥ ७४४ ॥
परन्त्वदूरदर्शित्वात् सम्पूर्णायाः क्षितेरसौ ।
अविदार्यादियुक्तायां रूपं द्रष्टुं न कल्पते ॥ ७४५ ॥
तथाऽल्पदर्शिनो मर्त्याः प्रभोर्लोकप्रकाशितुः ।
प्रजाशिक्षिक्रमं सम्यगवगन्तुं न शक्नुयुः ॥ ७४६ ॥
अतः खेष्टार्थ सिद्ध्यर्थं कानुपायान् परेश्वरः ।
प्रयोक्तुमर्हतीत्येतत् सम्यङ् मर्त्यैर्न बुध्यते ॥ ७४७ ॥
साधूनामैहिकं दुःखं दुष्टानाञ्चैहिकं सुखं ।
विलोक्य क्वचिदेकेषां विस्मयो हृदि जायते ॥ ७४८ ॥
चेदीश्वरो जगच्छास्ति यथाकर्मफलप्रदः ।
तर्हीदृग् दृश्यते कस्मात् न्याय्यशिक्षितिक्रमः ॥ ७४९ ॥
कुतो न साधुभिः सर्वैरैहिकं भुज्यते सुखं ।
दुष्कृद्भिश्चैहिकं दुःखमित्याद्यं सन्दिहन्ति ते ॥ ७५० ॥ युग्मं ॥
विचारिभस्तु तत्राऽज्ञैर्नाना दुःखसुखादिना ।
प्रजानामीश्वरः स्वासां करोतीह परीक्षणं ॥ ७५१ ॥
अमुत्र तु प्रजाशिक्षेः परिणामो भविष्यति ॥

Digitized by Google

सकलक्रियाफलं न्याय्यं तत्राप्यन्ति नरा इति ७५२ युग्मं ॥
तथा चेश्वरेण किं कार्यं किमकार्यं परात्मना ॥
इत्यल्पबुद्धयो मर्त्याः सम्यग् बोद्धुं न शक्नुयुः ॥ ७५३ ॥
तथापि लोश्वरानर्हाः सन्ति काश्चित् क्रिया इति ।
मनुष्यैः शक्यते ज्ञातुं सद्भिरप्यल्पबुद्धिभिः ॥ ७५४ ॥
वा हेहि पापकर्मभ्यः सुक्रियासु प्रसीदति ॥
तादृशां सदसज्ज्ञानीं बुद्धिं स्रष्टा यथाद् दधु ॥ ७५५ ॥
तया बुद्ध्या विवेकिन्या परमेश्वरदत्तया॥
मनुष्याः पारदार्यादिकर्मणां दौष्ठवं विदुः ॥ ७५६ ॥
चेत् तादृशानि कर्माणि पुमान् कोपि समाचरेत् ॥
तं सन्तः सम्मता भूत्वा मन्दं ब्रूयुरसंशयं ॥ ७५७ ॥
अतो नराकृतिं धृत्वा पवित्रात्मा परेश्वरः ॥
तादृक्कर्माचरेदित्थं सतां बुद्धौ न सम्भवेत् ॥ ७५८ ॥
मरिष्ठे ईदृशे वादे परेशोद्वेगके सदा ॥
विगीतेनात्मना विद्वन् भवितव्यं न संशयः ॥ ७५९ ॥
किञ्चाभासंशयानोऽहं वच्मि यः पारदारिकं ।
मनुष्यमीश्वरं ब्रूयाद् ईशं निन्देदसाविति ॥ ७६० ॥
ये निन्द्यं तादृगाचारं कर्तुं शक्तं परात्मना ॥
मन्यन्ते ते जनास्तस्य न बोधन्ति पवित्रतां ॥ ७६१ ॥
य ईश्वरो नृणां धर्मं चित्तवृद्धिश्च वाञ्छति ।
असौ कथं स्वयं दद्याद् भ्रष्टाचारनिदर्शनं ७६२ ॥

Digitized by Google

तस्माच्च धीमता विद्वन् त्वया तत्त्वमुपागुना ॥
शास्त्रस्य पारमैश्वर्यं ज्ञातुं मन्तुं न युज्यते ॥ ७६३ ॥
तथा च येषु शास्त्रेषु शास्त्रस्यैश्वर्यमुच्यते ॥
अमूनि पौरुषेयाणि सर्वाणि स्युरसंशयं ॥ ७६४ ॥
शास्त्रस्य यद्ददाचारः पुराणेषूच्यतेऽशुचिः ॥
तथा नाना दुराचारो महादेवस्य कथ्यते ॥ ७६५ ॥
पुराणपारगैः सर्वो ज्ञायते तस्य विस्तरः ॥
अतो न विद्यते तस्य वर्णनेन प्रयोजनं ॥ ७६६ ॥
तादृक्शास्त्रासतो यत्र शिवस्यैश्वर्यमुच्यते ॥
अमीषामपि शास्त्राणां तर्क्यते पौरुषेयता ॥ ७६७ ॥
येऽमी पुराणकर्त्तारो दुष्कर्माणि परेश्वरे ॥
तादृग्व्यारोपयामासुस्ते सत्त्वं तस्य नाविदुः ॥ ७६८ ॥
महातेजस्विनं कञ्चिद् विशिष्टं मानुषैर्गुणैः ॥
प्रकल्प्यते खया मत्या परमेश्वमचक्षत ॥ ७६९ ॥
यत्प्रभावात् पुराणानां पौरुषेयत्वमूह्यते ॥
मतानि तत्र तादृंणि विलोक्यन्तेऽपराण्यपि ॥ ७७० ॥
देवाख्याकीर्त्तनाद्येन नृणां दुष्टहृदामपि ॥
अघेभपापसंशुद्धि भंवतीत्युच्यते क्वचित् ॥ ७७१ ॥

यथा विष्णुधर्मतत्त्वे ॥

'चक्रायुधस्य नामानि सदा सर्वत्र कीर्त्तयेत् ॥
नाशौचं कीर्त्तने तस्य स पवित्रकरो यथा ॥

Digitized by Google

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयाऽपि संस्पृष्टो दहत्यग्निर्हि पावकः' इति ॥
गङ्गादिस्नानमात्रेण तीर्थयात्रादिनाऽपि च ॥
पापानां जायते शुद्धिरित्यपि क्वचिदुच्यते ॥ ७७२ ॥
पुमान् कुमार्गमत्यक्त्वा मानसीं शुद्धिमन्तरा ।
लभेत पापसंशुद्धिमित्यत्यन्तमसन्मतं ॥ ७७३ ॥
कुमार्गात्यागिनां पुंसां पापशुद्धिर्भवेद् यदि ।
तर्ह्यकृत्ये न त्यजेत् कोपि चित्तशुद्धौ यतेत वा ॥ ७७४ ॥
परेश्वरेण मर्त्यानां चित्तशुद्धिमभीप्सता ।
एतादृशं मतं प्रोक्तं इति विद्वन्न सम्भवेत् ॥ ७७५ ॥

वेदविद्वानुवाच ॥

भवान् यदाह तन्नास्ति ग्राह्याणां वास्तवं मतं ॥
स्खलेष्वन्येषु भूयो हि चित्तशुद्धिः प्रदिश्यते ॥ ७७६ ॥

सत्यार्थ्युवाच ॥

स्खलेष्वन्येषु ग्राह्याणां चेतःशुद्धिः प्रदिश्यते ॥
इत्यस्य निश्चयो विद्वन् कोपि न क्रियते मया ॥ ७७७ ॥
परन्त्वापत्तिमेतर्हि यान्युद्दिश्य करोम्यहं ॥
तेषु स्खलेषु न क्वापि चित्तशुद्धिः प्रदिश्यते ॥ ७७८ ॥
जपस्नानादिमात्रेण पापशुद्धिरवाप्यते ॥
शुद्धिं विनाऽन्तरीमित्यं बुध्यते तत्त्वचाक्षुषः ॥ ७७९ ॥
स्खलानां युष्मदुक्तानां मदुक्तानाञ्च दर्शनात् ॥

Digitized by Google

तत्तन्मध्य विपर्य्यायो महानस्तीति भाति मे ॥ ७८० ॥
आस्तामां तादृग्रं दृष्ट्वा विपर्य्यायं परस्परं ॥
ततोऽपि तर्कये तेषां सर्वेषां पौरुषेयतां ॥ ७८१ ॥
मुनीनां न्यायसांख्यादिसर्वदर्शनवादिनां ॥
अप्रामाण्यं यतो हेतो मन्ये तत् पूर्वमब्रुवं ॥ ७८२ ॥
एतर्हि दर्शनोक्तानां मतानामवलोकनात् ॥
तानीमोक्तानि वा नेति करवाव विचारणं ॥ ७८३ ॥
सर्वेषां तत्तदुक्तानां मतानां विस्तरं तु न ॥
पश्याव किन्तु मुख्यानां करवाव परीक्षणं ॥ ७८४ ॥
आदौ वेदान्तिभि र्यादृगद्वैतं प्रतिपाद्यते ॥
तत् सम्भाव्यस्ति वा नेति करणीयं विचारणं ॥ ७८५ ॥
बहुत्वमात्मनां नास्ति स्वस्वार्थक्रियतिश्च या ॥
अस्त्यस्ति मोहसम्भूता सेति वेदान्तिनो विदुः ॥ ७८६ ॥
मतं वेदान्तिनामेतद् विदन् नाङ्गीकरोम्यहं ॥
अवधीयतां सर्वं यद् मया कथयिष्यते ॥ ७८७ ॥
यं सर्वे परमात्मानं स्वीकुर्वन्ति विचारिणः ॥
स चेतनोऽस्ति विश्वस्य स्रष्टा पाता नियामकः ॥ ७८८ ॥
जडानां यः स्वभावोऽस्ति पदार्थानाञ्च ये गुणाः ॥
तस्येच्छयैव ते सर्वे अधीयन्त न चान्यथा ॥ ७८९ ॥
अतः स्वस्वार्थिताबुद्धि र्नृषु यास्ति स्वभावजा ॥
असावाकस्मिकी नास्ति विहिता तु परात्मना ॥ ७९० ॥

Digitized by Google

विश्वस्य शासिता यद्यत् परमात्मा करोति तु ।
तत्तत् कस्यापि सिद्ध्यर्थं सदर्थस्य विधीयते ॥ ७९१ ॥
स त्रैलोक्येशिता धीमानप्रमेयो मनुष्यवत् ॥
कदापि स्वीयया कर्म न करोति निरर्थकं ॥ ७९२ ॥
स सत्यः सत्तमः पुण्यः पवित्रात्मा दयामयः ॥
कदापि मर्त्यवत् स्वीया न विमोहयति प्रजाः ॥ ७९३ ॥
यदत्र मानुषा लोके सुखदुःखादि भुञ्जते ॥
तत् सर्वं वास्तवं विद्वन् विहितं परमात्मना ॥ ७९४ ॥
समस्ता आत्मनोऽन्येभ्यो भिन्नान् बोधन्ति मानुषाः ॥
अयं दासोऽस्ति मेऽसौ तु मम स्वामीति ते विदुः ॥ ७९५ ॥
यदिच्छेयं तथा कुर्यां नियन्ता कोपि नास्ति मे ॥
प्रजाराज्ञोरभेदोऽस्ति चेति कोपि न बोधति ॥ ७९६ ॥
कर्त्रां परस्पराभेदं कोपि मन्येत यद्यपि ॥
तथापि नाचरेल्लोके खबुद्धेरनुसारतः ॥ ७९७ ॥
तादृक्समतानुसारेण कोपि चेत्तु समाचरेत् ॥
तदीया लौकिकी यात्रा तर्हि सेढुं न शक्नुयात् ॥ ७९८ ॥
तस्माच्च ये मिथो नृणां भेदमाऊरवास्तवं ॥
तदास्तवत्वमेतेऽपि स्वीकुर्वन्ति स्वकर्मभिः ॥ ७९९ ॥
यावच्च मानुषा जीवं यापयन्ति महीतले ।
प्रजा राजादिभेदोऽयं तावत् तैरनुभूयते ॥ ८०० ॥
प्रजाहि दुर्बला यावदत्र जीवति भूतले ॥

Digitized by Google

तावद् बलीयसो राज्ञो बलाद् मोक्तुं न शक्यते ॥ ८०१ ॥
राजा कश्चिच्छनं धृत्वा कक्षया चेत् प्रहारयेत् ।
तदाऽवश्यं महापीडां पुरुषोऽनुभवेदसौ ॥ ८०२ ॥
प्रजाराज्ञोस्तु यो भेद इह लोकेऽवतिष्ठते ॥
स मर्त्यै र्विहितो नास्ति नियन्ता तु परात्मना ॥ ८०३ ॥
स एवानन्तसामर्थ्यो विभुस्त्रैलोक्यशासिता ॥
प्रजागवान् महीपानां वपुः स्थापितवान् स्वयं ॥ ८०४ ॥
अतो विद्वन्नदृश्योऽपि परमात्मा स्वयं हरिः ॥
अधीश्वरो नियन्ता च विद्यतेऽत्र न संशयः ॥ ८०५ ॥
भेदः परात्ममर्त्यानां स्वाम्यदास्यात्मकोऽस्ति यः ॥
स नृणां मृत्युपर्यन्तमविकार्योऽवतिष्ठते ॥ ८०६ ॥
अतः स्वदास्यबुद्धिर्या नरैरत्रानुभूयते ॥
साऽमुत्र लोप्स्यतीत्येतत् कया युक्त्याऽनुमीयते ॥ ८०७ ॥
हरिं परात्मनिष्ठत्वं परलोके विनंक्ष्यति ॥
इत्यस्य साधनं किञ्चिदपि कर्तुं न शक्यते ॥ ८०८ ॥
नाहं परात्मनो भिन्न इति यः कोपि मन्यते ॥
असौ परात्मनः सेवां सम्यक् कर्तुं न शक्नुयात् ॥ ८०९ ॥
परन्तु साध्यतं यस्य वपुर्मर्त्याः क्षितौ समे ॥
तस्यैवा ज्ञानिभिः सर्वै र्नितरां कर्तुमर्ह्यते ॥ ८१० ॥
तस्माच्च प्रोदितं विद्वन्नेतद् वैदान्तिकं मतं ॥
त्रैलोक्यशासितुर्न्याय्यं प्रतिबध्नाति सेवनं ॥ ८११ ॥

Digitized by Google

तादृक् त्वनादरो यस्माज्जायते परमात्मनः ॥
अदः परात्मनो जातं मतमित्थं न सम्भवेत् ॥ ८१२ ॥
या स्वस्थक्षितावुद्धि र्नरेष्वस्ति स्वभावतः ॥
सा तेषां नीतये तेन विहितास्ति परात्मना ॥ ८१३ ॥
यस्तां स्वनीतये दत्तां बुद्धिं नानुसरेद् नरः ॥
असौ परात्मनाऽऽदिष्टं पन्थानं मोहितस्त्यजेत् ॥ ८१४ ॥
मार्गे स्वकल्पिते यस्तु ज्ञानहीनस्तथा व्रजेत् ॥
खाभीष्टसिद्धिमप्राप्य भ्रमध्वान्ते स्खलेदसौ ॥ ८१५ ॥
अतो वेदान्तिनामेतद् मतं त्यक्त्वा भ्रमोद्भवं ॥
भवान् स्वस्थक्षितावुद्धे र्विश्वास्यतां न शङ्क्यतां ॥ ८१६ ॥

वेदविदानुवाच ॥

चिराय नौ समालापः प्रवृत्तोऽस्ति महाशय ॥
भवान् संक्षेपतो ब्रूयात् तद्यद् अन्यद् विवक्षति ॥ ८१७ ॥

सत्यार्थ्युवाच ॥

बहुत्वमात्मनां सांख्ये न्यायशास्त्रे च मन्यते ॥
तदीयेऽस्मिन्मते विद्वन् सम्मतिं विद्धि मामिकां ॥ ८१८ ॥
सर्वेषामात्मनां यस्तु तयो र्नित्यत्वमुच्यते ॥
मद्बुद्धौ तन्मतं मिथ्या निर्भ्रमाख्ये विद्यते ॥ ८१९ ॥
एतस्य विद्यमानस्य जन्मनः समयात् पुरा ॥
अविद्येऽहं कदापीति कोपि स्मर्तुं न शक्यति ॥ ८२० ॥
परन्तु वेद् मनुष्याख्यामात्मानः प्राग्वित्तत ॥

Digitized by Google

कुतस्तस्यात्मनां सत्त्वं प्राक्तनं न स्मरन्ति ते ॥ ८२१ ॥
नित्यत्वमात्मनामेवं सृत्यभावाद् न साधितं ॥
अन्येन युक्तिरूपेण प्रमाणेन न सिध्यति ॥ ८२२ ॥
मद्धुद्धौ केवलं नित्यं परमात्मानमन्तरा ॥
त्रिलोक्यां क्वापि कोप्यन्य आत्माऽनादिर्न विद्यते ॥ ८२३ ॥
नित्यत्वं परमाणूनामपि नैयायिका विदुः ॥
नित्यत्वं प्रकृतेस्तद्वत् कपिलस्यानुयायिनः ॥ ८२४ ॥
उभे त्विमे मते मह्यं न रोचेते महाशय ॥
परेशमन्तरा किञ्चिदप्यनादि न विद्यते ॥ ८२५ ॥
नाशक्यतासतः स्रष्टुं जगदेतत् परात्मना ॥
इत्याऽऽ र्न्यायमन्तारस्तथा वेदान्तिनोऽपि च ॥ ८२६ ॥
यतः स वस्तुनः स्वस्मात् परमात्माऽस्रजज्जगत् ॥
इदं ब्रह्मात्मकं विश्वमिति वेदान्तिनो विदुः ॥ ८२७ ॥
नवं किन्वीश्वरो नित्यैरणुभिः सृष्टवान् जगत् ॥
इत्याऽऽ र्न्यायवेत्तारो वेदान्तस्य विरोधिनः ॥ ८२८ ॥
किन्वीश्वरोऽसतो विश्वमेतत् स्रष्टुं न शक्तवान् ॥
इत्यत्र सम्मतिस्तेषामुभयेषां प्रतीयते ॥ ८२९ ॥
सिद्धान्तोऽयं तु तै र्विद्वद्भुभयैः सम्मतोऽस्ति यः ॥
स निर्मूलोऽस्ति मद्बुद्धौ निभ्रमाणश्च सर्वथा ॥ ८३० ॥
नित्यं स्वयम्भुवं सर्वे यं मन्यन्ते मनीषिणः ॥
स सर्वशक्तिरप्यस्ति परमात्मा न संशयः ॥ ८३१ ॥

Digitized by Google

परन्तु वस्तुतस्तस्य सर्वशक्तित्वमस्ति चेत् ॥
कृतस्तर्ह्यसतो विश्वमेतत् सृष्टुं स नाशकत् ॥ ८३२ ॥
स्वयम्भुवोऽप्रमेयस्य सामर्थ्यं मातुमक्षमाः ॥
विपश्चितः कृतस्तस्य सामर्थ्यस्यावधिं विदुः ॥ ८३३ ॥
अतोऽसतो जगत् सृष्टुं सर्वशक्तिः शशाक सः ॥
इत्यत्र संशयो विद्वन् विद्वैः कर्तुं न युज्यते ॥ ८३४ ॥
सस्मात्तु वस्तुतो विश्वं परात्मा सृष्टवानिति ॥
मतं वेदान्तिनां सद्यमसम्भवं प्रतीयते ॥ ८३५ ॥
दृश्याः स्पृश्याश्च ये सन्ति पदार्था जगतीगताः ॥
तेऽनात्मरूपकाः सर्वे चैतन्येन च वर्जिताः ॥ ८३६ ॥
यश्चेतनोऽविकारश्च परमात्मा स्वभावतः ॥
सोऽचैतन्यमनात्मत्वं परिगम्य कथं व्रजेत् ॥ ८३७ ॥
अणूनां मोक्षमोक्षे तु नित्यत्वं क्षीयते सति ॥
ईशस्य सर्वशक्तित्वं सत्यत्वञ्च क्षीयते ॥ ८३८ ॥
रागादिभावनाशेन विना सिद्धिर्न जायते ॥
इति न्यायादिशास्त्रेषु सिद्धान्तत्वेन मन्यते ॥ ८३९ ॥
एतन्मतं तु मद्बुद्धौ भ्रमजन्यं प्रतीयते ॥
रागादिभावमात्रे हि कोपि दोषो न विद्यते ॥ ८४० ॥
ये ये रागादयो भावा वस्तु सन्ति स्वभावतः ॥
ते स्वाभीष्टार्थसिद्ध्यर्थं व्यधीयन्त परात्मना ॥ ८४१ ॥

Digitized by Google

परेश्वरेण तेनैव अधीयन्त जगत्त्रया ॥ ८४२ ॥
अतो रागादयः सर्वे विषयेषु यथोचितं ॥
नरैः प्रयोक्तुमर्ह्यन्ते सर्वैरत्र न संशयः ॥ ८४३ ॥
किन्त्वौत्तम्यादिभेदेन विषया रागकर्षिणः ॥
न्यूनाधिकेन रागेण सेव्याः सन्ति महाशय ॥ ८४४ ॥
सर्वोत्तमा हि यावन्तो विषयाः सन्ति तावतां ॥
सर्वाधिकेन रागेण सेवा कार्य्या नरैः समैः ॥ ८४५ ॥
ये त्वन्ये विषयाः सर्वे तुच्छाः सन्ति स्वभावतः ॥
अमी न्यूनेन रागेण सेवितव्या न संशयः ॥ ८४६ ॥
धनादि श्रेयसी विद्या ज्ञानाद् धर्मश्च सत्तरः ॥
अन्येभ्यश्चेतनेभ्यश्च सत्तरः परमेश्वरः ॥ ८४७ ॥
अतो न्यूनेन रागेण धनं सेवितुमर्ह्यते ॥
ततोऽधिकेन विज्ञानं ततो धर्मोऽधिकेन तु ॥ ८४८ ॥
यः सत्तमस्तु सर्वेषां विषयाणां परेश्वरः ॥
सर्वाधिकेन रागेण सेवितव्यः स विद्यते ॥ ८४९ ॥
अनेकान् विषयान् नित्यमभीच्छन्नपि लौकिकान् ॥
तद्भोगं सम्यगासाद्य तृप्तिमात्मा न विन्दति ॥ ८५० ॥
परेशमन्तरा कोपि विषयोऽन्यो जगत्त्रये ॥
भजतेरात्मनां तृप्त्यै कल्पमानो न विद्यते ॥ ८५१ ॥
परेशप्रार्थिनो भावाः श्रद्धाप्रेमसमादराः ॥
अन्ये च तादृशा विद्वन् त्वयु सन्ति स्वभावतः ॥ ८५२ ॥

Digitized by Google

दयामाहात्म्यसत्त्वादिविशिष्टत्वात् परेश्वरः ॥
तेषां प्रेमादिभावानां परमो विषयोऽस्ति च ॥ ८५३ ॥
अतो दृष्टीदृशान् भावान् प्रेमादीन् परमेश्वरः ॥
स्वयैव सेवनार्थाय कल्पवान् नात्र संशयः ॥ ८५४ ॥
अतः प्रेमादिकान् भावानीश्वरे ये प्रयुञ्जते ॥
जनास्ते ईश्वराभीष्टमाचरन्ति महाशय ॥ ८५५ ॥
ये सत्तमे तु तादृक्षे विषये सत्युदासिनः ॥
ते लोका ईश्वरस्येच्छां विरुन्धन्तीति भाति मे ॥ ८५६ ॥
यः खान् रागादिकान् भावानुच्छिनत्ति सर्वथा ॥
स आत्महिंसको भूत्वा खाङ्गमेकं लुलूषति ॥ ८५७ ॥
सर्वाङ्गसंयुतो मर्त्यो यस्मै कार्य्याय कल्पते ॥
तत्कार्य्यं छिन्नहस्तादिः पङ्गुः कर्त्तुं न शक्नुयात् ॥ ८५८ ॥
तथा रागादिकान् भावान् प्रयुञ्जानो यथोचितं ॥
नरः परेश्वरेशाय सर्वधर्म्माय कल्पते ॥ ८५९ ॥
स्वीयानां यस्तु भावानां समुच्छेदं चिकीर्षति ॥
स पङ्गुवत् परेशेऽकार्य्यसिद्धौ न कल्पते ॥ ८६० ॥
परेश्च खस्य भावानामप्रयोगाद् विरागिणः ॥
आत्मा जडत्वमापद्य क्षीणशक्तिः प्रजायते ॥ ८६१ ॥
अतो रागादिभावानां समुच्छेदेन मानुषाः ॥
स्वेष्टां सिद्धिं न गच्छन्ति प्रयोगेणोचितेन तु ॥ ८६२ ॥
यथा प्रेमादिभावानां विषयोऽस्तीश्वरोऽधुना ॥

Digitized by Google

तथा परत्र स ख्याता प्रेमाद्यैः सेवनोचितः ॥ ८६३ ॥
लोपस्तेषां तु भावानां परलोके भविष्यति ॥
इत्यस्य साधनं किञ्चिदपि कर्त्तुं न शक्यते ॥ ८६४ ॥
एतस्मिन्नो समालापे विद्वन् यद्यदतर्कयं ॥
भवानपक्षपातेन तत् समस्तं विचारयेत् ॥ ८६५ ॥
स्वदेशीयेषु शास्त्रेषु दर्शनादिव्वविश्वसन् ॥
भवानन्यत्र कुत्रापि तत्त्वमन्वेषुमर्हति ॥ ८६६ ॥

वेदविदानुवाच ॥

एतद्देशीयशास्त्राणां खण्डनाय यथामति ॥
नानायुक्त्यात्मकैस्तर्कैरद्य चेष्टितवान् भवान् ॥ ८६७ ॥
स्वदेशोत्पन्नशास्त्राणां दूषणेनार्हितोऽपि सन् ॥
अहं भावत्कवादस्य करिष्यामि विचारणं ॥ ८६८ ॥
परत्वत्यशास्त्राणि न विश्वासोचितानि चेत् ॥
तदा क्व व्याकुलात्माऽहं तत्त्वज्ञानमवाप्नुयां ॥ ८६९ ॥

सत्यार्थुवाच ॥

एताभ्यां वक्ष्यमाणाभ्यां प्रमाणाभ्यां सुसाधितं ॥
किमप्याप्येत चेच्छास्त्रं तर्हि श्रद्धोचितं भवेत् ॥ ८७० ॥
तच्छास्त्रस्येश्वरार्हत्व सदर्थेन विशिष्टता ॥
इत्येतत् प्रथमं तस्य प्रमाणं ज्ञायते मया ॥ ८७१ ॥
अपौरुषेयसामर्थ्यस्थितिः शास्त्रप्रवर्त्तके ॥
इति द्वितीयमाचष्टे शास्त्रप्रामाण्यसाधनं ॥ ८७२ ॥

Digitized by Google

सच्छास्त्रमावहन् कोपि तदीयोक्तत्वसिद्धये ॥
शक्तिं चेदद्भुतां स्वस्यां ब्रूयात्तर्हि परीक्ष्यतां । ८७३ ॥
शक्तिस्तु वस्तुतत्त्वज्ञा निश्चीयेतातिमानुषा ॥
तदा तदुक्तशास्त्रस्य प्रामाण्यं निश्चितं भवेत् ॥ ८७४ ॥
विश्वास्यैः साधितं ग्रन्थैः पूर्वदृत्तान्तवादिभिः ॥
चेदीदृक् शास्त्रमाप्येत तर्हि विद्वै विचार्यतां ॥ ८७५ ॥
तच्चेन्नृणां तु सर्वेषां त्राणोपायं प्रकाशयेत् ॥
तदा तद् गृह्यतां शास्त्रं सर्वैर्निस्तारलिप्सुभिः ॥ ८७६ ॥

वेदविद्वानुवाच ॥

स्वप्रोक्ताभ्यां प्रमाणाभ्यामाभ्यां प्रामाणिकीकृतं ॥
किमप्येतादृशं शास्त्रं किं जानाति स्वयं भवान् ॥ ८७७ ॥

सत्यार्थुवाच ॥

प्रागासीद् यस्य शास्त्रस्य येषूक्तिस्तः प्रवर्त्तकः ॥
उभाभ्यां तद् मदुक्ताभ्यां प्रमाणाभ्यां विशिष्यते ॥ ८७८ ॥
अर्थः परेश्वरानर्हस्तत्र कोपि न दृश्यते ॥
कृत्वो धर्मोपकार्यस्ति तदुक्तोऽर्थस्तु सत्तमः ॥ ८७९ ॥
यः श्रीयेषूक्त तच्छास्त्रं प्रावर्त्तद् महीतले ॥
सोऽपौरुषेयसामर्थ्यो विद्यते स्वयमीश्वरः ॥ ८८० ॥
विश्वास्यैः साक्षिभिर्दृष्टा कृत्वा तच्चरितावलिः ॥
तैरेव वर्णिता लेषु प्रबन्धेषु समाप्यते ॥ ८८१ ॥
अमी च तत्कृता ग्रन्थाः प्रचलन्त्यधुनावधि ॥

Digitized by Google

तथा परत्र स ख्याता प्रेमाद्यैः सेवनोचितः ॥ ८६३ ॥
लोपक्लेशां तु भावानां परलोके भविष्यति ॥
इत्यस्य साधनं किञ्चिदपि कर्त्तुं न शक्यते ॥ ८६४ ॥
एतस्मिन्नौ समालापे विद्वन् यद्यदतर्कयं ॥
भवानपक्षपातेन तत् समस्तं विचारयेत् ॥ ८६५ ॥
स्वदेशीयेषु शास्त्रेषु दर्शनादिष्वविश्वसन् ॥
भवानन्यत्र कुत्रापि तत्त्वमन्वेषुमर्हति ॥ ८६६ ॥

वेदविदानुवाच ॥

एतद्देशीयशास्त्राणां खण्डनाय यथामति ॥
नानायुक्त्यात्मकैस्तर्कैरद्य चेष्टितवान् भवान् ॥ ८६७ ॥
स्वदेशोत्पन्नशास्त्राणां दूषणेनार्दितोऽपि सन् ॥
अहं भावत्कवादस्य करिष्यामि विचारणं ॥ ८६८ ॥
परत्वत्यशास्त्राणि न विश्वासोचितानि चेत् ॥
तदा क्व व्याकुलात्माऽहं तत्त्वज्ञानमवाप्नुयां ॥ ८६९ ॥

सत्यार्थुवाच ॥

एताभ्यां वक्ष्यमाणाभ्यां प्रमाणाभ्यां सुसाधितं ॥
किमप्याप्येत चेच्छास्त्रं तर्हि अद्योचितं भवेत् ॥ ८७० ॥
तच्छास्त्रमेश्वरार्हेण सदर्थेन विशिष्टता ॥
इत्येतत् प्रथमं तस्य प्रमाणं ज्ञायते यथा ॥ ८७१ ॥
अपौरुषेयसामर्थ्यस्थितिः शास्त्रप्रवर्त्तके ॥
इति द्वितीयमाचष्टे शास्त्रप्रामाण्यसाधनं ॥ ८७२ ॥

Digitized by Google

सच्छास्त्रमावदन् कोपि तदीशोक्तत्वसिद्धये ॥
शक्तिं चेदद्भुतां स्वस्यां ब्रूयात्तर्हि परीक्ष्यतां । ८७३ ॥
शक्तिस्तु वस्तुतत्त्वज्ञा निश्चीयेतातिमानुषा ॥
तदा तदुक्तशास्त्रस्य प्रामाण्यं निश्चितं भवेत् ॥ ८७४ ॥
विश्वास्यैः साधितं ग्रन्थैः पूर्वैरुक्तान्यवादिभिः ॥
चेदीदृक् शास्त्रमाप्येत तर्हि विद्वैर्विचार्यतां ॥ ८७५ ॥
तत्रेक्षणां तु सर्वेषां नायोपायं प्रकाशयेत् ॥
तदा तद् गृह्यतां शास्त्रं सर्वैर्निस्तारलिप्सुभिः ॥ ८७६ ॥

वेदविदानुवाच ॥

स्वप्रोक्ताभ्यां प्रमाणाभ्यामाभ्यां प्रामाणिकीकृतं ॥
किमप्येतादृशं शास्त्रं किं जानाति स्वयं भवान् ॥ ८७७ ॥

सत्यार्थुवाच ॥

प्रागासीद् यस्य शास्त्रस्य येषूक्तिस्तः प्रवर्त्तकः ॥
उभाभ्यां तद् मदुक्ताभ्यां प्रमाणाभ्यां विशिष्यते ॥ ८७८ ॥
अर्थः परेश्वरानर्हस्तत्र कोपि न दृश्यते ॥
कृत्वो धर्मोपकार्यस्ति तदुक्तोऽर्थस्तु सत्तमः ॥ ८७९ ॥
यः श्रीयेषूक्त तच्छास्त्रं प्रावर्त्तद् महीतले ॥
सोऽपौरुषेयसामर्थ्यो विद्यते स्वयमीश्वरः ॥ ८८० ॥
विश्वास्यैः साक्षिभिर्दृष्टा कृत्वा तच्चरितावलिः ॥
तैरेव वर्णिता ग्रेषु प्रबन्धेषु समाप्यते ॥ ८८१ ॥
अमी च तत्कृता ग्रन्थाः प्रचलन्त्यधुनावधि ॥

Digitized by Google

खिस्तीयधर्मभक्तैश्च निषद्यते निरन्तरं ॥ ८८२ ॥
सर्वत्र मामकं ग्रा स्वंकीर्त्तयध्वं महीतले ॥
इत्येतदात्मनः शिष्यान् येषूखिलः समादिशत् ॥ ८८३ ॥
अतस्तत् सर्वदेशीयै र्ग्राह्यं ग्राह्यं नरैः समैः ॥
इत्यत्र कोपि सन्देहो मम बुद्धौ न विद्यते ॥ ८८४ ॥
पुनस्तु वासरे यस्मिन्नावयोः सङ्गमो भवेत् ॥
तदा खिस्तीयशास्त्रस्य सर्वं वक्ष्यामि विस्तरं ॥ ८८५ ॥
मध्याह्नोपस्थिते र्हेतोः सूर्य्यतापस्तु साम्प्रतं ॥
क्लेशप्रदः प्रजातोऽस्ति प्रस्थातव्यमितो मया ॥ ८८६ ॥
मिथः समागमो यावन्न भवेत् पुनरावयोः ॥
तावद् मत्प्रोदितं वादं भवान् सम्यग् विचारयेत् ॥ ८८७ ॥
स्वयं परेश्वरो युष्मान् येन सत्ये नयेत् पथि ॥
तदर्थं तं विनीतेन प्रार्थयस्वात्मना मुहुः ॥ ८८८ ॥
दयालुः सोऽखिलान्मर्त्त्यान् सत्ये मार्गे निनीषति ॥
अतो वः प्रार्थनां शृण्वन् स प्रसन्नो भविष्यति ॥ ८८९ ॥
इत्युक्ते सादरं विप्रौ तौ प्रणम्य परस्परं ॥
दिदृक्षू पुनरन्योन्यं प्रतस्थाते स्वसद्मनी ॥ ८९० ॥
इति मतपरीक्षायां भारतवर्षीयशास्त्रविचारो नाम प्रथमः खण्डः ॥

Digitized by Google

२३ पृष्ठवर्त्ति १६१ श्लोकानन्तरसन्दर्भं यद् दुर्गाचार्यस्य वाक्यं तदत्रोच्यते ॥ यथा ॥

'विष्णुरादित्यः कथमिति यत आह त्रेधा निदधे पदम् निधत्ते पदम् निधानम् पदैः क्व तत्र तावत् पृथिव्यामन्तरिक्षे दिवीति ब्राह्मणैः ॥ पार्थिवो ऽग्निर्भूत्वा पृथिव्याम् यत्किञ्चिदस्ति तदिक्रमते तदधितिष्ठति अन्तरिक्षे वैद्युतात्मना दिवि सूर्यात्मना ॥ यदुक्तम् तमू अक्तवयन् त्रेधा भुवेक्रमिति ॥ समारोहणे उदयगिरावुद्यन् पदमेकन्निधत्ते ॥ विष्णुपदे मध्यन्दिनेऽन्तरिक्षे ॥ गयशिरस्य खंगिराविवैर्यनाभ आचार्यो मन्यते ॥ एवं समूढमस्य पांसुरे ॥ अस्मिन् प्रायणे एतस्मिन्नंतरीक्षे सर्वभूतरूढिहेतौ यन्मध्यमं पदं विद्युदात्मकं तत्समूढं अन्तर्हितं न नित्यं दृश्यते' इति ॥

एतस्यां व्याप्तौ तेन प्रतीतायां मनीषिणा ॥
न वामनावतारस्य कोप्युद्देशो विलोक्यते ॥

Digitized by Google



Digitized by Google

Digitized by Google

Digitized by Google


Digitized by Google